दाखल क्र M653 विषय धर्मशास्त्र

नाव. प्रवर निर्णय (प्रवरकौस्तुभ) M558

लेखक/लिपीकार गणेश रघुनाथ पाठक रचित सदाशिव बरडे लिखित

पृष्ठ 38 काळ — पूर्ण/अपूर्ण

॥अथप्रवरनिर्णयप्रारंभः॥

॥श्रीगणेशाय नमः॥ अथ भट्टोजीदीक्षितकृतचतुर्विंशतिमतविवर्णितगोत्रप्रवर
निर्णयो लिख्यते॥ असमानार्षगोत्रजामिति॥ ऋषेरिदमार्षं प्रवरः॥ गोत्रप्रवर्त
कस्य मुनेर्व्यावर्तकमुनिगण इत्यर्थः॥ तद्यथा॥ गोत्रप्रवर्तकस्य भरद्वाजस्य व्याव
र्तकावांगिरोबृहस्पती॥ अत एवांगिरसबार्हस्पत्यभारद्वाजगोत्रमिति प्रयुंजते॥
गोत्रं तु वंशपरंपरामिति प्रसिद्धं॥ स्वसमाने आर्षे गोत्रे यस्य तस्माज्जाता या न भव
ति तामित्यर्थः॥ यस्कवामाधुलमौनमौनकानां भिन्नगोत्राणामविभागेपि वीतहव्यसा
वतसेति प्रवरैक्यान्न विवाहः॥ इति माधवादयः॥ वस्तुतस्तु वत्सार्ष्टिषेणयोः प्रव
रैक्यान्न विवाहः॥ द्व्यामुष्यायणानां संकृतीनां वासिष्ठैः सगोत्रत्वादविवाह इति॥
असंकीर्णोदाहरणं बोध्यं॥ एवं कपीनां गर्गादिभिरपि॥ मातृगोत्रापि केषांचिन्नि
षिद्धा॥ तथा च सत्याषाढवचनं॥ मातृगोत्रां माध्यंदिनीयानामिति॥ गोत्ररि

क्थे जनयितुर्न भजेत्कृत्रिमः सुत इति वचनाद्दत्तकस्य यद्यपि पितृगोत्रप्राप्तिस्तथा
पि नोद्वाह्या॥ असगोत्रा च या पितुरिति मनुना पितृकुलोपादानादिति स्मृतिचंद्रि
कायां॥ प्रवरैक्ये विशेषमाह बौधायनः॥ पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्व
योः॥ भृग्वंगिरोगणेष्वेवं शेषेष्वेकोपि वारयेदिति॥ न च गोत्रप्रवरयोर्मिलितयोः
पर्युदासनिमित्तत्वं शंक्यं॥ प्रत्येकं दोषाभिधानात्॥ तदाह बौधायनः॥ सगोत्रां चेत्
मत्योपयच्छेन्मातृवदेनां बिभृयात्॥ गौतमश्च॥ असमानप्रवरैर्विवाह इति शातात
पोपि॥ परिणीय सगोत्रां तु समानप्रवरां तथा॥ कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं
विशोधनमिति॥ आपस्तंबः॥ समानगोत्रप्रवरां कन्यामुद्वोपगम्य च॥ तस्यामुत्पा
द्य चांडालं ब्राह्मण्यादेव हीयते॥ संग्रहे॥ सगोत्रां समानप्रवरां कामतः परिणीय प्र
जामुत्पाद्य गुरुतल्पगव्रतं चरेत्॥ प्रजां चांडालेषु निक्षिपेत्॥ अकामतस्तत्र कृच्छ्रं॥ प्र
जाया भरद्वाजगोत्रांतर्भावः॥ प्रजानुत्पादने चांद्रायणं॥ विवाहमात्रे कृच्छ्रं॥ सर्वत्र तां

ते अष्टौ नरशतं होमः ॥ परित्यक्तां तां जननीवत्पश्येत् ॥ स्मृत्यर्थसारेपि ॥ इत्थं सगोत्रसं
बंधं विवाहविषये स्थिते ॥ यदि कश्चिदज्ञानतस्तां कन्यां उद्वोपगच्छति ॥ गुरुतल्प
व्रतं लघु ध्येद्गर्भस्य ज्ञातांसतां व्रजेत् ॥ भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥ अ
ज्ञानाच्छेदैंदवस्फ शुध्येद्गर्भस्तु कश्यप इति ॥ अथ प्रसंगाद्गोत्रप्रवरनिर्णयः कथ्यते ॥
सप्तर्षिणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति बोधायनादयः ॥ एवं च यद्यपि गो
त्रप्रवर्तकं जमदग्निप्रसूतिमूलपुरुषं सप्तर्षिबहिर्भूतं भृगुमधिकृत्य साम्नातानां के
वलभार्गवाणां आर्ष्टिषेणादीनां स्वस्वगणेपि गोत्रत्वं न सिध्यति ॥ तथा केवलांगि
रसानां विष्णुवृद्धादीनां संकृत्यादीनां च ॥ गोतमभरद्वाजौ प्रतिमूलभूतं अंगिरो
मात्रमधिकृत्य साम्नातानां ॥ तथाप्यत्र गोत्रापत्तिरेव ॥ तथा न सत्त्वे एवैषां गोत्रसगोत्रैते
इति प्रवरमंजरीकृतोक्तं ॥ अत एव स्मृत्यर्थसारेपि केवलभृग्वंगिरोगणेषु प्रवरैक्यमा
त्रेण निषिद्धो नाविवाह इति उक्तं ॥ प्रवरैक्यतः स्वं स्वं हित्वा गणमिति ॥ अन्येषु

गि

॥२॥

यमधिकृत्य प्रवराम्नातानां न गोत्रं ॥ ततश्चार्ष्टिषेणादीनधिकृत्य प्रवराम्नाताः सप्तर्षिबाह्यत्वे
पि गोत्रत्वमेष्टव्य ॥ तथा च सत्याषाढसूत्रे प्रवरान्व्याख्यास्याम इत्युक्त्वा तेगोत्राणीत्युक्तं ॥
न चैवं भृग्वंगिरसोप्यनुवृत्ता जामदग्न्यौ वत्सविदयोः परस्परमिवार्ष्टिषेणादिभिरपि
सगोत्रतापत्तिः ॥ तत्र पर्युदासात् ॥ तथा च बोधायनः ॥ एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त
ते ॥ तावत्समानगोत्रत्वं अन्यत्र भृग्वंगिरोगणादिति ॥ १ ॥ भृग्वंगिरसो भिन्नस्यैकस्य ऋषे
रनुवृत्तिः सगोत्रताप्रयोजक इत्यर्थः ॥ एवं च समानगोत्रत्वमित्यस्य समानप्रवरत्वमित्यर्थो
पि मदनपारिजातोक्तोस्मिन्पक्षे नादरणीयं ॥ एवं सति समानगोत्रत्वे नैव निषेधसिद्धे
समानप्रवरस्या संकीर्णोदाहरणं दुर्लभमिति ॥ तत्र ॥ वत्सार्ष्टिषेणयोर्विदार्ष्टिषेणयोः
पृषदश्वरथीतरयोश्च भिन्नगोत्रयोः समानप्रवरत्वात् ॥ तस्माद्धरितादीनामपि
गोत्रत्वमित्याहुः ॥ यद्यपि गोत्राणामवांतरभेदाः सहस्रशस्तथापि तद्गणा एकोन
पंचाशत् ॥ तथा च बोधायनः ॥ गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ॥ ऊन

॥३॥

पंचाशदेते षांप्रवरा ऋषिदर्शनादिति ॥ सप्तैव भृगवः सप्तदशांगिरसस्तथैव च ॥ ततोत्रे
यश्च चत्वारो बोद्धव्याः कश्यपस्त्रयः ॥ १ ॥ चत्वारोत्र वसिष्ठास्युर्विश्वामित्रस्त
तो दश ॥ अगस्तयश्च चत्वारः इति संग्रहकृद्वचः ॥ तथाहि ॥ तत्र भृगूणां सप्तग
गणाः ॥ तत्र द्वौ जामदग्न्यौ ॥ वत्सा बिदाश्चेति ॥ तत्र वत्सानां पंचप्रवराः ॥ वत्सानां ॥
भार्गवच्यावनाप्नवानौर्वजामदग्न्येति ॥ भार्गवौर्वजामदग्न्येति त्रयो वा ॥ १ ॥ बिदानां
पंचप्रवराः ॥ भार्गवच्यावनाप्नवानौर्वबैदेति ॥ भार्गवौर्वजामदग्न्येति त्रयो वा ॥ २ ॥
रमौ द्वौ सगोत्रौ ॥ जमदग्निः सप्तर्षिषु पाठान्तरे ॥ इतरे पंच केवलभार्गवाः ॥ आर्ष्टिषेणाः
यस्काः मित्रयुवः वैन्याः शुनकाइति ॥ तत्रार्ष्टिषेणानां पंचप्रवराः भार्गवच्यावनाप्न
वानार्ष्टिषेणानूपेति ॥ भार्गवार्ष्टिषेणानूपेति त्रयो वा ॥ ३ ॥ एषां त्रयाणां परस्परमवि
वाहः ॥ तदुक्तं ॥ जामदग्न्या वत्सविदा आर्ष्टिषेणाः परस्परं नाभिविशु ॥ प्रवरैक्येन स
गोत्रत्वेन चादिमाविति ॥ ३ ॥ यस्कानां त्रयः प्रवराः ॥ भार्गववैतहव्यसावेतसेति ॥ ४ ॥

॥३॥

मित्रयुवां त्रयः ॥ भार्गवदैवोदासवाध्र्यश्वेति ॥ वाध्र्यश्वेति एको वा ॥ ५ ॥ वैन्यानां त्रयः ॥
भार्गववैन्यपार्थेति ॥ ६ ॥ शुनकानां मेकार्षेयप्रवराः ॥ शौनकेति ॥ गार्त्समदेति वा ॥
भृगुगृत्समदेति वा ॥ भार्गवशौनहोत्रगार्त्समदेति त्रयो वा ॥ भार्गवशौनकगार्त्सम
देति त्रयो वा ॥ ७ ॥ एषां चतुर्णां परस्परं विवाहोस्ति ॥ पूर्वोक्तैस्त्रिभिश्च वक्ष्यमाणैश्च ॥
तदुक्तं ॥ यस्का मित्रयुवो वैन्याः शुनकाः प्रवरैक्यतः ॥ स्वं स्वं गणं हि हासर्वे विवहेयुः
परावरैः रिति ॥ इति भृगोः सप्तवंशा निर्णीताः ॥ केचित्तु ॥ अधिकं गणद्वयमुक्तं ॥ वे
दविश्वज्योतिषां ॥ आर्षेयप्रवराः ॥ भार्गववेदवैश्वज्योतिषेति ॥ शाठरमाठराणां
भार्गवशाठरमाठरेति त्रयः ॥ १ ॥ अथांगिरसां षोडशानां तद्गणाः ॥ तत्र गोतमांगिर
सां सप्तगणाः ॥ आयास्याः शारद्वताः कौमंडाः दीर्घतमसः कारेणुपालयः वामदेव्याः औ
शनाश्चेति गणा सप्त ॥ ७ ॥ तेषां प्रवराः ॥ तत्र आयास्यानां त्रयः प्रवराः ॥ आंगि
रसआयास्यगौतमेति ॥ १ ॥ शारद्वतानां त्रयः ॥ आंगिरसगौतमशारद्वतेति ॥ २ ॥

कौमंडानां पंच ॥ आंगिरस औतथ्य काक्षीवत गौतम कौमंडेति ॥३॥ दीर्घतमसानां पंच ॥
आंगिरस औतथ्य काक्षीवत गौतम दैर्घतमसेति ॥ आंगिरस औतथ्य दैर्घतमसेति त्रयो
वा ॥४॥ कारेणुपालानां त्रयः ॥ आंगिरस गौतम कारेणुपालेति ॥५॥ वामदेवानां त्रयः ॥
आंगिरस गौतम वामदेवेति ॥६॥ औशनसानां त्रयः ॥ आंगिरस औशनस गौतमेति ॥७॥
एते सप्त सगोत्राः ॥ वामदेवा गौतमा इति आपस्तंबः ॥ तेषां आंगिरस वामदेव बार्हदुक्थेति
त्रयः ॥ औतथ्या गौतमा इति केचित् ॥ तेषां आंगिरस औशिज काक्षीवतेति ॥८॥
अथ भारद्वाजा आंगिरसाश्चत्वारः ॥ भरद्वाजाः रौक्षायणाः गर्गाः कपय इति ॥ तत्र
भरद्वाजानां त्रय प्रवराः ॥ आंगिरस बार्हस्पत्य भारद्वाजेति ॥१॥ रौक्षायणानां पंच प्रवराः ॥
आंगिरस बार्हस्पत्य भारद्वाज वांदन मातवचसेति ॥२॥ गर्गाणां पंच ॥ आंगिरस
बार्हस्पत्य भारद्वाज गार्ग्य शैन्येति ॥ आंगिरस शैन्य गार्ग्येति त्रयो वा ॥ भारद्वाज गा
र्ग्य शैन्येति त्रयो वा ॥३॥ कपीनां त्रयः प्रवराः ॥ पंच प्रवरस्तु कपि गर्गेतर्भूताः ॥

॥५॥

अनेन सगोत्रश्च बोध्यः ॥ आमहीयव रौक्षयस्य प्रवरस्य कपेः विष्णुवृद्धादिवत् आं
गिरसत्वसंबीरस भरद्वाजैः सहान्वयमिच्छंति ॥ तस्माद् दृशितव्यं ॥ प्रवरमंजर्यादि
पारिजातादिषु बहुग्रंथविरोधाश्च ॥ अतएवाषाढ धागवान्निभजाद्भिः संग
हकाः [illegible] रैः कपेः कपीनां समं विवाहो निषिद्धः ॥ भरद्वाजगणस्यापि तथा कपिग
णस्य च ॥ विवाहो न विधेयस्यादन्योन्यं तु कदाचनेति ॥४॥ एषां चतुर्णां परस्पर
विवाहो नास्ति ॥ तदुक्तं ॥ भरद्वाजाः सकपयो गर्गा रौक्षायणा इति ॥ चत्वारोपि भ
रद्वाजा गोत्रैक्यान्नान्वयु मिथः ॥ इति ॥ अथ केवलांगिरसां पंच ॥ विष्णुवृद्धाः
कण्वाः हरिताः रथीतराः मुद्गलाश्चेति ॥५॥ तत्र विष्णुवृद्धानां त्रय प्रवराः ॥ आंगि
रस पौरुकुत्स्य त्रासदस्येति ॥ एषामन्यैः सह विवाहोस्ति ॥१॥ कण्वानां त्रय प्रवराः ॥
आंगिरस आजमीढ काण्वेति ॥ आंगिरस घोर काण्वेति वा ॥२॥ हरितानां त्रयः
आंगिरस अंबरीष यौवनाश्वेति ॥ मांधात्र अंबरीष यौवनाश्वेति वा ॥३॥

॥५॥

रथीतराणां त्रयः॥ आंगिरसवैरूपराथीतरेति॥ आंगिरसवैरूपपार्षदश्वेति वा॥४॥ मु
द्गलानां त्रयः प्रवराः॥ आंगिरसभार्म्यश्वमौद्गलेति॥ यद्वा॥ तार्क्ष्यभार्म्यश्वमौद्ग
लेति वा॥५॥ विष्णुवृद्धादीनां पंचानामपि केवलांगिरसां स्वस्वं गणं हित्वा अन्यैः
सह विवाहोस्ति॥ तदुक्तं॥ केवलांगिरसश्चैके विष्णुवृद्धास्तु कण्वजाः॥ हरिता
रथीतराश्च मुद्गलाः प्रवरैक्यतः॥ स्वंस्वं हित्वा गणं सर्वे विवहेयुः परावरैरिति॥
तदेवं अंगिरसां षोडश वंशा निर्णीताः॥१६॥ द्व्यामुष्यायणवंशेन वक्ष्यमाणाः
संस्कृतयस्तु आंगिरसस्तु सप्तदशः॥ केचित्तु अन्येपि केवलांगिरसः पठ्यंते॥
यथा॥ कुत्सानां त्रय प्रवराः॥ आंगिरसमांधात्रकौत्सेति॥ एषां हरितैरविवाहः॥
त्र्यार्षेयाणां द्व्यार्षेयाणां संनिपातात्॥ हरितकुत्सपिंगशंखदर्भहैमगवानां द्व
याश्वलायनेन सर्वप्रवरसाम्योक्तेश्चेति त्रिपुरुषोत्तमः॥ पृषदश्वानामांगि
रसपार्षदश्ववैरूपेति॥ अष्टादंष्ट्रपार्षदश्ववैरूपेति वा॥ एषां रथीतरैरवि

॥५॥

वाहः॥ प्रवरद्वयसाम्यात्॥७॥ अत्रेः चत्वारो भेदाः॥ आद्यात्रयः॥ गविष्ठिराः॥ वा
द्भुतकाः॥ मुद्गलाश्चेति॥४॥ तत्राद्यात्रीणां त्रयः प्रवराः॥ आत्रेयार्चनानसश्यावाश्वे
ति॥१॥ गविष्ठिराणां त्रयः॥ आत्रेयार्चनानस[illegible]गाविष्ठिरेति॥२॥ वाद्भुतकानां
त्रयः॥ आत्रेयार्चनानसवाद्भुतकेति॥३॥ मुद्गलानां त्रय प्रवराः॥ आत्रेयार्चनान
सपौर्वातिथेति॥४॥ एषां चतुर्णां परस्परं नान्वयः॥ तदुक्तं॥ चत्वारोऽत्रयो आ
द्यात्रिवाद्भुतका गविष्ठिरा मुद्गलाश्चेति गोत्रैक्यात्सप्तनरैस्त्वाच्च नान्वियुरिति॥७॥
इत्यात्रिवंशा निर्णीताः॥ अथ कश्यपानां त्रयो भेदाः॥ निध्रुवरेभशांडिल्येति॥
इति त्रयः॥३॥ तत्र निध्रुवानां त्रयः प्रवराः॥ काश्यपावत्सारनैध्रुवेति॥१॥
रेभाणां त्रयः प्रवराः॥ काश्यपावत्साररैभ्येति॥२॥ शांडिल्यानां त्रयः॥ काश्य
पावत्सारशांडिल्येति॥ काश्यपावत्सारदेवलेति॥ काश्यपावत्सारासितेति वा॥
शांडिल्यासितदेवलेति वा॥३॥ निध्रुवादीनां त्रयाणां काश्यपानां परस्परं नोद्वा

हः॥ गोत्रप्रवरयोरैक्यात्॥ इति कश्यपवंशनिर्णीताः॥ ६॥ वसिष्ठाश्चत्वारः॥ वसिष्ठाः
कुंडिनाः उपमन्यवः पराशरा इति॥ तत्र वसिष्ठानामेकप्रवरः॥ वासिष्ठेति॥ त्र्यो वा॥
वासिष्ठैंद्रप्रमदाभरद्वस्विति॥ १॥ कुंडिनां त्रयः॥ वासिष्ठमैत्रावरुणकौंडिन्ये
ति॥ २॥ उपमन्यूनां त्रयः॥ वासिष्ठैंद्रप्रमदाभरद्वस्विति॥ ३॥ पराशराणां त्रयः॥
वासिष्ठशाक्त्यपाराशरेति॥ ४॥ एषां चतुर्णां परस्परमविवाहः॥ तदुक्तं॥ वसिष्ठा
कुंडिनाश्चैव उपमन्यु पराशराः॥ वसिष्ठा इति चत्वारो गोत्रैक्यान्नान्वयुर्मिथः इति॥
इति वसिष्ठवंशनिर्णीताः॥ ७॥ अथ विश्वामित्राः॥ ते दश॥ कुशिकाः रोहिताः

॥ ६॥

रौक्षकाः कामकायनाः धनंजयाः॥ कताः अजाः अघमर्षणाः पूरणाः इन्द्रकुशिका इति॥
एते दश॥ १०॥ तत्र कुशिकानां त्रयः॥ वैश्वामित्रदेवरातौदलेति॥ १॥ रोहितानां त्रयः॥
वैश्वामित्राष्टकरोहितेति॥ २॥ रौक्षकानां त्रयः॥ वैश्वामित्ररौक्षकरैवणेति॥ ३॥ कामका
यनानां त्रयः॥ वैश्वामित्रदेवश्रवसदैवतरसेति॥ ४॥ धनंजयानां त्रयः॥ वैश्वामित्र

॥ ६॥

माधुछंदधनंजयेति॥ ५॥ कतानां त्रयः॥ वैश्वामित्रकात्योत्कीलेति॥ ६॥ अजानां त्र
यः॥ वैश्वामित्रमाधुछंदसाऽजेति॥ ७॥ अघमर्षणानां त्रयः॥ विश्वामित्राघमर्षणकौ
शिकेति॥ ८॥ पूरणानां द्वौ॥ विश्वामित्रपौरणेति॥ ९॥ इन्द्रकुशिकानां त्रयः॥ वैश्वामि
त्रैन्द्रकौशिकेति॥ १०॥ एतेषां दशानां परस्परं न विवाहः॥ इति विश्वामित्रवंशनिर्णीताः॥ ८॥
अथागस्त्यः॥ ९॥ ते च चत्वारः॥ इध्मवाहाः सांभवाहाः सोमवाहाः यज्ञवाहाः॥ ४॥ इति॥
तत्रेध्मवाहानां त्रयः प्रवराः॥ आगस्त्यदार्ढ्यच्युतैध्मवाहेति॥ १॥ सांभवाहानां त्रयः॥
आगस्त्यदार्ढ्यच्युतसांभवाहेति॥ २॥ सोमवाहानां त्रयः॥ आगस्त्यदार्ढ्यच्युतसोमवा
हेति॥ ३॥ यज्ञवाहानां त्रयः॥ आगस्त्यदार्ढ्यच्युतयज्ञवाहेति॥ ४॥ एषां चतुर्णां गोत्रै
क्यात्प्रवरैक्याच्च परस्परं न विवाहः॥ इति अगस्तिवंशनिर्णीताः॥ ९॥ तदेवं॥ भृगवः
सप्त॥ ७॥ आंगिरसः सप्तदश॥ १७॥ अत्रयश्चत्वारः॥ ४॥ कश्यपास्त्रयः॥ ३॥ वसि
ष्ठाश्चत्वारः॥ ४॥ विश्वामित्रा दश॥ १०॥ अगस्त्यश्चत्वारः॥ ४॥ इत्येवमेकोनपंचाशद्

णानिर्णिता:॥४॥ क्षत्रियाणां त्रय:॥ मानववैलपौरूरवसेति॥ वैश्यानां त्रय:॥ भालंदन
वात्सप्रमांकिलेति॥ बौधायन:॥ न चैव क्षत्रियवैश्ययो: सजातीयैर्विवाह एव न स्यात्॥
इति वाच्यं॥ एतेषां प्रवराणां विवाहनिषेधाप्रयोजकत्वात्॥ तदुक्तं॥ गुरो: सगोत्रप्रवरा
यो ह्याद्यास्तत्रैव हि जन्मनै: इति॥ समानप्रवरोद्वाहो निषेध: क्षत्रियवैश्ययो:॥ प्रवरो
मानवैलस्मात्प्रवरा ह्यन्योन्यगोचर: इति॥ मानवैलादिप्रवरा अस्माच्च भालंदने
सादिप्रवराश्च अन्यगोचरा निषेध इत्यन्वय:॥ अथ द्व्यामुष्यायणा:॥ तत्रांगि
रससंकृतीनां त्रय: प्रवरा:॥ आंगिरसगौरिवीतसांकृत्येति॥ शाक्त्य गौरिवीतसांकृत्येति॥
एते अन्य:॥ संकृतीनां वशिष्ठै: सह विवाहो नास्ति॥ क्रियमाणतयानुद्वत्स भावोपि
उत्पादकतया वशिष्ठस्यानुवृत्ते:॥ उक्तं च॥ संकृतीनां द्विजस्य स्याद्वशिष्ठैश्च चतु
र्विधै:॥ स्ववर्गीयै: सगोत्रत्वात्स न चैक्याच्चैता न्वय:॥६॥ इति॥ लौगाक्षीणां त्रय:
प्रवरा:॥ काश्यपावत्सारवाशिष्ठेति॥ तेच्चाहवशिष्ठा: नक्तं काश्यपा:॥ वशिष्ठ काश्य

पानां लौगाक्षीणां विवाहो नास्ति॥ तदुक्तं॥ वशिष्ठै: काश्यपैर्नियं लौगाक्षीणां मनन्वयु:॥
अह वशिष्ठ नक्तं कश्यप्रयाजा आदिगोचरेति॥ किंच॥ विश्वामित्र आत्रिगोत्रयैर्नो वहेयु
र्धनंजय:॥ अत्रेरकपुत्रिकापुत्रा: वामरथ्यादयस्तथा॥ आत्रेयैवजातुकर्ण्याश्च वशिष्ठै
रत्रिभि: सहेति॥ धनंजया वामरथ्यादय: श्चात्रिविश्वामित्राभ्यां न विवहेयुरित्यर्थ:॥ त
था जातुकर्ण्याश्चात्रिवशिष्ठाभ्यां न विवहेयु:॥ भारद्वाजेन शौंगेन विश्वामित्रस्य शैशि
रेर्क्षेत्रे जाता द्विगोत्रवि: प्रोच्यते शौंगशैशिरा विश्वामित्रभारद्वाजैस्सगोत्रेन नान्वय:॥
अयमेव कतशैशिरि: शौंगइत्युच्यते॥ तस्य पंच प्रवरा:॥ आंगिरस बार्हस्पत्य भार
द्वाज कात्याक्षिलेति॥ कपिलानां भरद्वाजे विश्वामित्रैश्च नान्वय:॥ धनंजयानां अत्रि
विश्वामित्राभ्यां नान्वय:॥ कपिलानां भरद्वाजे विश्वामित्रैश्च नान्वय:॥ अन्यत्रापि॥
कश्यपेयगणस्यापि वशिष्ठस्य गणस्य च॥ संकृति: पूतिमाषाभ्यां विवाहो न परस्परं॥
आत्रेयस्य गणस्यापि विश्वामित्रगणस्य च॥ धनंजयोस्य गोत्रेण नान्योन्यं पो
णिपिडनं॥२॥ जामदग्न्यगणस्यापि विश्वामित्रगणस्य च॥ नेदवराणगोत्रेण

विवाहस्यापरस्परं ॥६॥ इति ग्यामुष्यायणगणानिर्णयः ॥ अथ भृगुवंशगणनिर्णयः ॥ भार्ग
वजामदग्न्यानां वर्गत्रयं ॥ वत्साः विदाः आर्ष्टिषेणाः ॥३॥ एषां त्रयाणां भार्गवजामदग्न्या
नां न विवाहः ॥ अथ शुद्ध भार्गवाणां वर्ग चतुष्टयं ॥ यस्काः मित्रयुवः वैन्याः शुनकाः
एते चत्वारः येषां चतुर्णां परस्परं विवाहः ॥१॥ अथांगिरोगणानिर्णीताः ॥ आंगिरो
गौतमानां वर्गाष्टकं ॥ गौतम औतथ्य शरद्गण वामदेव बृहदुक्थ सोमराट् कक्षीवा
न् दीर्घतमाः ॥ एषां मष्टानां परस्परं नान्वये ॥ अंगिरो भरद्वाजानां वर्ग चतुष्टयं ॥
भरद्वाज रौक्षयगर्ग अग्निवेश्याः ॥ एषां चतुर्णां परस्परं न विवाहः ॥६॥ संपूर्णे
अत्रिगणे ॥१॥ संपूर्णे वशिष्ठ गणे ॥२ संपूर्णे कश्यपगणे ॥३॥ संपूर्णे विश्वामि
त्रगणे ॥४॥ संपूर्ण अगस्त्यगणे ॥५॥ एषु पंचे गणेषु स्वगणे न विवाहः ॥ स्वगणे वि
११८॥ वाहो नास्ति ॥ भिन्नगणे विवाहः ॥ अंगिरो वशिष्ठः ॥ केवलांगिरसानां वर्गसप्त
कं ॥ कण्व ॥१॥ संकृति ॥२॥ विष्णुवृद्ध ॥३॥ हरित ॥४॥ मुद्गल ॥५॥ कपि ॥६॥ पृषदश्व ॥७॥

एतेसप्त ॥७॥ एषां सप्तानां परस्परं विवाहः ॥ इति स्वस्वगणनिर्णयः ॥ अथ ग्यामुष्या
यण विचारः ॥ लौगाक्षीणां कश्यप वशिष्ठ वंशयोः विवाह नास्ति ॥ जामरथ्यानां जात्
कर्ण्यानां च अत्रि वशिष्ठ वंशयोरविवाहः ॥ सांकृत्यगणस्थितानां वशिष्ठवंशेन विवा
हः ॥ धनंजयस्थितानां अत्रिविश्वामित्रयोर्वंशयोरविवाहः ॥ देवरातस्य जाम
दग्न्य विश्वामित्रवंशयोरविवाहः ॥ देवरातो विश्वामित्रगणस्थितः ॥ शुद्ध जा
मदग्न्याः भृगुगणस्थाः वत्सो मत्स्याः ---- दैव्या ईसर्थः ॥ शुद्ध जाम
दग्न्याद् देवरातस्य मातामहा भवंति ॥ इति कारणादविवाहः ॥६॥ इति भ
ट्टोजिदीक्षितकृत प्रवरनिर्णयः समाप्तः ॥ श्री कृष्णार्पणं ॥६॥ ॥६

॥१२॥

इति प्रवरनिर्णयसमास ॥ परोपकारार्थं

॥१२॥

॥ श्रीगणेशाय नमः ॥ श्रुतिमूलं गणेशानं ऋषीन् बौधायनादिकान् ॥ नत्वा च शिवमीशानं कुर्वे प्रवरकौस्तुभं ॥१॥ ऋषिप्रणीतसूत्राण्यालोक्य स्मृतिसंग्रहान् ॥ गोत्रप्रवरसंदर्भं गणेशस्तनुते सुधीः ॥२॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रोथ गौतमः ॥ जमदग्निर्वशिष्ठश्च सप्तैते ऋषयः स्मृतास्तदपत्यं गोत्रं ॥ तथा चोक्तं ॥ अपत्यं पौत्रं प्रभृति गोत्रमित्याह पाणिनीरिति ॥ सप्तर्ष्यगस्त्यपत्यानि गोत्राणि बौधायनोब्रवीदिति ॥ अतः सप्तर्षीणामगस्त्याष्टमानां यदपत्यं पुत्रपौत्रप्रभृति मित्यर्थः ॥ तथा च स्मृतिः ॥ सौम्यतवकिं गोत्रं ॥ वत्सगोत्रं वशिष्ठ

॥९॥

गोत्रावयवमिति॥सप्रवरां कन्यां नोद्वहेदित्युक्तत्वात्॥होत्रध्वर्युभ्यां प्रवणीतइतिप्रवराः॥तथा च श्रुतिः॥यस्से द्वौ द्वा ऋद्धिकामाः सत्रमासीरन्नार्षेयं प्रवृणीतइति॥ऋषेरयमार्षेयः॥तथाहि॥एकं वृणीते द्वौ वृणीते त्रीन्वृणीते न चतुरो वृणीते पंच वृणीते न पंचातीतइतिश्रुतेः॥एकं वा द्वौ वा त्रीन्वा प्रवरान्वृणीते न चतुरः प्रवरान्वृणीत पंच वा प्रवरान्वृणीते न पंचातीतान्प्रवरान्वृणीतइत्यर्थः॥अतः प्रतिगोत्रे प्रवराः कर्त्तव्यत्वेनाभिहिताः॥अतो समानप्रवरैर्विवाहइतिगौतमः॥तथा च याज्ञवल्क्यः॥अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां॥तां कन्यां उद्

॥९॥

हेदिति॥असमानार्षजामसमानप्रवरपुरुषजां॥असमानार्षगोत्रजां भिन्नगोत्रपुरुषजामिति॥तथा चापस्तंबः॥सगोत्राय दुहितरं न प्रयच्छेदित्युक्तत्वा असमानार्षगोत्रपुरुषजां कन्यामुद्वहेदित्यर्थः॥समानार्षगोत्रविवाहे प्रत्यवायः स्यादित आह यमः॥आरूढपतितापत्यं ब्राह्मण्यां यश्च शूद्रजः॥सगोत्रोढासुतश्चैव चांडालास्त्रय ईरिताः इति॥९॥तथा च स्मृतिः॥मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च॥समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेत्॥उक्तत्वात्सगोत्तरं चांद्रायणं विहितं॥सगोत्रोढासुतेतु चांडालत्वप्रसक्त्या वर्णसांका

॥२॥

यप्रसिद्धिरिति ॥ असमानार्षबहुसंचाहुः ॥ पंचानां त्रिषु सामान्यादविवाह
स्त्रिषु द्वयोः ॥ भृग्वंगिरागणेष्वेवं शेषेष्वेकोपि नार्षेयतः ॥ १ ॥ केवलं भृ
ग्वंगिरसश्च भिन्नगणे विवाहं कुर्युः ॥ कुतः ॥ तेषां भृग्वंगिरसां गणा
नां सप्तर्ष्युपसाभावे गोत्रत्वाभावः स्तेन न च भृग्वंगिरोगणेषु पंचार्षे
याणां त्र्यार्षेयसंन्निपाते त्र्यार्षेयाणां द्व्यार्षेयसन्निपाते च परस्परम
विवाहः ॥ भृग्वंगिरोगणांतर्गत जमदग्निगोतमभरद्वाजेषु गणेषु
एकप्रवरसन्निपातेपि सर्वेषामप्यसाम्यं वा सगोत्रत्वादेव स्वस्वगणे
न विवाहः ॥ कुतः सत्तयानुगोत्रानुवृत्तेवृत्केवलात् ॥ भृग्वादिसंज्ञासा

॥२॥

प्यजामदग्न्यादिषु संज्ञाविशेषबोधात् तेन च जामदग्न्यगोतमभरद्वाजानां
भृग्वंगिरोवंशत्वसिद्धमिति ॥ शेषेषु भृग्वंगिरोभिन्नेषु सर्वगणेषु एकप्रव
रसन्निपातेपि परस्परमविवाहः ॥ सन्निपातो परस्परमैक्यं ॥ एवं ब्रह्मक्षत्रि
यविशां समानार्षगोत्रत्वात्परस्परमविवाहः ॥ यान् अधिकृत्य प्रवरा आम्ना
तास्तादृशाः कोटित्रितयसंख्याता ऋषयः परिकीर्तिताः ॥ इत्येकैकस्यां तादृ
शान् ऋषीन् वक्तुमशक्य स्वीकृणाः प्रोक्ता स्वेकोनपंचाशत् ॥ तथाहि ॥
भृगूणां सप्त ॥ तत्रांतर्गणास्त्रयो जामदग्न्याः ॥ चत्वारो भृगवः ॥ एवं
सप्त ॥ आंगिरसां षोडश ॥ तत्र गोतमाः सप्त ॥ भरद्वाजाश्चत्वारः ॥ सुधां
गिरसा पंच ॥ शौंगशैशिरिरित्येके ॥ अत्रेश्चत्वारः ॥ कश्यपास्त्रयः ॥ च

प्रवराभिन्नगोत्रेषु मातृगोत्रं न चिं
तयेदिति प्रवरनियामकवचनं॥
गोत्रमेवसमुज्जे मातुश्चिति कात्यायन

गोत्रं बीद्विति॥ तथा च माठरगृह्ये॥३

सारो वशिष्ठाः॥ विश्वामित्राद्रुग्रा॥ अगस्त्यश्च सार॥ आमुष्यायणास्तेष्वंतर्भू
ता एव॥ इत्थमेकोनपंचाशद्गणास्मृताः॥ एषां समानार्षगोत्रत्वं च स्वस्वस्था
ने वक्ष्यमाणः॥ मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च वेदस्कंदेन किंतु गो
त्रं मातुः पितुर्वा द्वयोरित्यत्र संज्ञायेमनुराह॥ असपिंडा च या मातुरसगो
त्रा च या पितुः॥ सा द्विजानां प्रशस्ता स्त्रीदानकर्मणि मैथुने इत्यनेन वि
वाहे मातृगोत्रस्यागो विहितः॥ तथा च माठरगृह्ये॥ मातृगोत्रसमानो
द्वहेत्॥ प्रवरानुपितृगोत्रेषु मातृगोत्रेष्वचिंतनमित्यनेन यद्यपि के
वलं मातृगोत्रं विवाहे वर्ज्यमित्युक्तं तथापि सप्रवरं मातृगोत्रं चिंत
नमिति॥ मातृगोत्रं तु माध्यंदिनीयानां वर्ज्यमिति सत्याषाढस्मृ ॥२॥

तौ उक्तत्वात् सासितत्वमिति चेन्न॥ कुतः॥ सर्वैरपि मातृगोत्रं विवाहे व
र्ज्यमित्युक्तं प्रवरमंडार्यां॥ एकस्मिन् प्रवरे तु स्यान्मातृगोत्रवरस्य च॥
तमुद्वाहं न कुर्वीत सा कन्या भगिनी भवेदित्युक्तत्वान् मातृगोत्रप्रवरचिं
तनमित्युक्तं तदपि पुत्रविज्ञायमिति॥ सगोत्रां मातुरप्येके नेच्छंत्युद्वाह
कर्मणीति प्रचेताः॥ मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च॥ समा
नप्रवरां चैव सह्या चांद्रायणं चरेत्॥ इत्यादिस्मृतिकारैरुक्तत्वात् पि
तृगोत्रवत् सप्रवरं मातृगोत्रं सर्वैरपि विवाहे वर्ज्यमित्युक्तं स्मृत्यं
तरस्य तुल्यबलत्वात् संदिग्धो मातृगोत्रविवाहस्तथापि मातृ
गोत्रसमानोद्वहेदित्युक्तत्वान् मातृगोत्रविवाहो न कर्त्तव्यो दोषप्राय

श्चिन्तयो गुरुत्वाभिधाना साक्षिको विहितदोषः परिहर्त्तव्य इति अर्थः ॥
गोत्रान्मातुः सपिंडाच्च विवाहो गोवधस्तथा ॥ नराश्वमेधोमद्यं च कलौ वर्ज्यमिति हेमाद्रिः ॥ माधवीयाश्वलायनादिस्य पुराणेषु चैकमिति प्रवरदर्पणोक्तेः ॥ तथा मातृगोत्रसमां नोद्वहेदिति ॥ नदुक्तं प्रवरमंजर्यां ॥ पित्रोर्द्वयोः समानत्वादपत्यानां द्वयोरपि ॥ गोत्रद्वयो नविवाहोस्ति प्रतिषेधस्मृतेरपि ॥ १ ॥ दूषितो बहुभिः शिष्टैः क्रीयते कश्चिदेव सः ॥ संभाव्यमानदोषत्वाद्वर्जनीयो बुधैरपि ॥ २ ॥ इत्युक्तत्वात् पितृगोत्रवत्सप्रवरं मातृगोत्रं विवाहे वर्ज्यमिति ॥

एवं इदानीं ततो नाम पि दत्तक्रीतकृत्रिमपुत्रिकापुत्रादीनां द्विगोत्राणामुभयोरुत्पादकपरिग्रहीत्रोः पित्रोर्गोत्रद्वयं सप्रवरं विवाहे वर्ज्यमित्यर्थः ॥ मूलं तत्रैकमेव पित्रोर्द्वयोः समानत्वादपत्यानां द्वयोरपि ॥ गोत्रद्वयो नविवाहोस्ति प्रतिषेधस्मृतेरपि ॥ १ ॥ तथा च स्मृतिः ॥ प्रथमं प्रवरः प्रोक्तो पितुरुत्पादकस्य यः ॥ परिग्रहीतु पाश्चात्यः शौंगशैशिरिणां यथेत्युक्तत्वाद्दत्तपुत्राणामुभयोः पित्रोः सगोत्रैर विवाह इत्यर्थः ॥ क्षत्रियविशां तु त्र्यार्षेयः प्रवरा भवंति ॥ पुरोहितप्रवरो राज्ञामित्याश्वलायनः ॥ तेन च द्विविधाः ॥ क्षत्रियाः पुरोहितप्रवरैः सह समानप्रवरत्वादविवाह इति ॥ इति क्षात्रियवैश्याप्रवराः निर्णिताः ॥

स्वगोत्राज्ञाने किं गोत्रवत्कृत्यमित्यत्राहुरापस्तंबादयः ॥ स्वगोत्रं प्रवरं स्व
यं विप्रा नैव जानते तेषां विवाहे प्रवराः कथं स्युरिति संशये ॥ आपस्तंबा
दयः प्राहुः सर्वज्ञाः संशयच्छिदः ॥ अथ स्वप्रवराज्ञाने बंधुराचार्यमुख्य
वरणात्प्रवरमनुब्रवीताचार्यप्रवरं वृणीत इति श्रुतिः ॥ अस्यार्थः ॥
बंधुगोत्रं प्रवरं वा अनुब्रवीत अनुब्रूयादाचार्यः प्रवरं वृणीत इति ॥
तथा च गोत्राज्ञाने सत्याषाढः ॥ अज्ञातबंधुपुरोहितप्रवरेणाचार्य
प्रवरेणेति वा ॥ यत्तु गोत्राज्ञाने काश्यपं गोत्रमिष्यत इति उक्तं तत्तु
श्राद्धादिविषयमिति ॥ प्रवरदर्पणे भट्टेरुक्तो विवाहे तु स्वगोत्राज्ञा
ने आचार्यगोत्रप्रवरनिर्मिते सर्वनिबंधिनां मतमिति ॥ आचार्य

॥५॥

स्तु द्विविधः सावित्रीप्रदानकर्त्ता सिलेवाचार्यो गर्भाधानादिसंस्कारोप
देष्टा सन्मंत्रादिउपदेष्टा वाचार्यः ॥ एवं सत्याचार्यगोत्रप्रवरैः ॥ शिष्या
णां परस्परमविवाहः ॥ तथा चोक्तं ॥ अज्ञातगोत्रप्रवरा आचार्यप्र
वराः स्मृता ॥ पश्चैचास्मिन्विवाहे पितृगोत्रे सह वर्ण्यते ॥ १ ॥ यश्च मं
त्रप्रदाता स्याद्यश्च विद्याप्रदायकः ॥ गुरुत्वापि स कन्येषा दत्ता तगो
त्रप्रवराणामाचार्यगोत्रप्रवरैर्विवाह इति ॥ गद इति श्रीकृष्णात्मज
राघवसूनुना गणेशपाठकेन विरचिते प्रवरकोस्तुभे गोत्रार्षस्वरूप
निर्मितं ॥ अथ गोत्रविस्तारः ॥ अथ भृगवः सप्त ॥ तत्रांतर्गणास्त्र
यो जामदग्न्याः ॥ वत्सविदार्ष्टिषेणाश्च ॥ तत्रादौ वत्सगणः ॥ ६ ॥

बोधायनसूत्रे ॥ वत्स॰ मार्कंडेयः॰ मांडव्यः॰ मांडूकेयः॰ कौसेयः॰
आलेकवणो॰ दार्भायण॰ शार्करादय॰ दैवतायन॰ शौनकायन॰ सा
धूकेय॰ पार्षिक॰ सांक॰ प्रतापन॰ पौंग॰ पैंग॰ पैंगलायन॰ आत्रेषय॰ बा
ल्वकय॰ वैश्वानर॰ बहीतरय॰ विरोहित॰ बाभ्रव॰ मौजायन॰ अष्टकय॰
काश्यदत्त॰ वाहितक॰ दर्भभाग॰ पतिज्ञाय॰ जानय॰ पाणिनि॰ वाल्मि
कि॰ स्वौल्पिंडय॰ सैपाल॰ वाजिहितय॰ सावर्णिकायन॰ वालायन॰
सौकतेय॰ मैउ॰ वत्स॰ विरूपमय॰ देवलामय॰ कौबोदरय॰ कौबोदरव
लू॰ बैल॰ विरूपाक्ष॰ दशाश्व॰ श्वोबैमेहन्यव॰ देमसायन॰ मर्कायन॰
कालायन॰ वायव॰ देवमसा॰ आकर्यण॰ कौकायण॰ पायविन॰ शौंक

॥ ६ ॥

रव॰ चमस॰ गांगेय॰ नोपेय॰ याज्ञिकायनि॰ बाहुमित्रायण॰ आपिशा
लय॰ वैष्टपुरेय॰ लौहितायन॰ उष्ट्राक्ष॰ मालायन॰ शारद्वतायन॰
शाह॰ जितबाह॰ वात्स्यायनादयः ॥ तथा चापस्तंबगोत्राक्षिकाया
यनसूत्रेषु ॥ भार्गव॰ जामदग्न्य वत्सा॰ दार्भि॰ नालीयनि॰ वाग्या
यन॰ नासातक॰ जैह्मति॰ पौल॰ शौनकायनि॰ जीवति॰ कौवलो
दरि॰ वैहानरि॰ वैरोह्य॰ रौरवायनि॰ ययाति॰ वैश्वानरि॰ वैरूपा
क्षि॰ पर्णिलि॰ दक्षाण॰ उद्ध्ययन॰ सास्यकर्णि॰ वैष्टपुरेय॰ बालाकि॰
तालवर्शि॰ नामृत॰ भागेन॰ भार्गव॰ मार्कंडेय॰ मांडूकेय॰ जिहि
त॰ आतिथिनास्थ॰ मालकौशा॰ वार्हि॰ कर्कराक्षि॰ देवमत॰ नासा

करायण० आह्लायन० गो गायन० कासायन० गाल्लायन० वैशंपायन०
शांर्ङक्षि० गालव० गार्भायण० गोह्लायण० शार्कराक्षि० माण्डूकेय० वै
कर्णि० सांकृत्य० याज्ञेय० भाष्ट्रेय० भास्त्रेय० क्षेम० लौकुचि० लौकी०
पाली० मंडली० मोणयण० उलूधि० अधिगोवि० सौष्मिकि० पैंगल०
पन० सात्यकायन० घन० कावह० हस्ति० चांड० सम० लालेय० कोउचक्षु०
कौंचाक्षी० कांससार० ध्वजि० पांद्य० लेपयन० कर्षि० कोध० सेव० शा
कल्य० उद्दालक्षि० पाकानुमति० जैकानुमति० जैकाजिक० जैह्म० उष्मकम०
निराणि० वत्रि० मोदनस्य० कुठरणि० लवेरणि० सौगोलि० कान्राच्छत्तन०
॥८॥ कारास्च्छ्र० माध्योद० आपस्तंबसूत्रे श्रीवत्सा० इत्येते जामदग्न्या ॥८॥

वत्साः एषांपंचार्षेयः प्रवराभवंति ॥ भार्गवच्यवनाप्नवानौर्वजाम
दग्न्येति ॥ त्रयोवाभार्गवौर्वजामदग्न्येति ॥ आश्वलायनसूत्रेवा
त्स्यानांत्रयः ॥ भार्गवच्यवनाप्नवानिति ॥ प्रयोगपारिजातेदेव
रातो जामदग्न्येषुगणितः ॥ इतिप्रवरकौस्तुभे जामदग्न्यवत्सगणः
प्रथमः ॥ १ ॥ अथविदः ॥ आपस्तंबसूत्रे ॥ विदाः० शैलाः० आवटाः० प्राची
नयोग्याः० अभयदानाः० कांडारथयः० वेतभृतः० पुलस्तयः० अर्कायणः० तौ
म्रायणः० कामलः० इत्येतेषांपंच ॥ भार्गवच्यवनाप्नवानौर्वविदेति ॥ बौधा
यनसूत्रे ॥ जामदग्न्यः० विदः० प्राचीनयोग्यः० पौलस्त्यः० वैभूतः०
कौंचायनः० अनयजातः० त्रैकायन० आवटः० आज० इत्येतेविदाः ॥ २

॥८॥

षांत्रयः॥भार्गवौर्वजामदग्न्येति॥इतिप्रवरकोस्तुभेविदगणोद्विती
यः॥२॥अथार्ष्टिषेणाः॥बौधायनसूत्रे॥आर्ष्टिषेणाः० नैरथय० ग्रा
म्यायन० कात्यायन० चांद्रायण० पटलकायण० सिद्ध० सुपनायन० गो
रंभि० राभि० सावर्णि० जिवंति० ओमायनि० एतिश्वायन० वैराहिस्य०
वर० मंड० प्राचीनयोग्य० इतिगोलाक्षिसूत्रे॥भृगवोदि० मार्गपथ०
अध्वन० एकशिरा० आपस्तंबी० वाल्हिकी० दमोयन० गर्दभि० अनू
पेति० एतेआर्ष्टिषेणास्तेषांपञ्च॥भार्गवच्यवनाप्नवार्ष्टिषेणानू
पेति॥भार्गवार्ष्टिषेणानूपेतित्रयोवा॥एतेत्रयोजामदग्न्यग
णाः॥एषांअन्योन्यमवाहः गोत्रंप्रवरैक्यात्॥स्मृत्यर्थसारे॥आ

॥८॥

र्ष्टिषेणानांएकार्षेयोभार्गवेति॥विदवत्साभ्यांसहाविवाहः प्रवरसा
म्यत्वादितिपूर्वं तुल्यमेवेति॥ग्रंथांतरेतु॥जामदग्न्यवत्सानांत्रयो
वा॥भार्गवच्यवनाप्नवानेति॥वात्स्यानांत्रयः॥भार्गवच्यवनाप्न
वानेति॥वत्सपुरोधसयोः पंचार्षेयः॥भार्गवच्यवनाप्नवानवत्स
पुरोधसेति॥वैजवनिमथितयोः पंचार्षेयः भार्गवच्यवनाप्नवान
वैजवनिमथितेति॥एषांमिथोजामदग्न्यैर्नविवाहः॥प्रवरैक्या
च्चेति॥वत्सविदार्ष्टिषेणाश्च पंचत्रिप्रवराइमे॥गोत्रप्रवरयो
रैक्यान्नविवाहपरस्परं॥३॥इतिकृष्णात्मजराघवसूनुनागणेश
पाठकेनसूरिणाविरचितेप्रवरकोस्तुभेजामदग्न्यगणनिर्णयः॥३॥

॥१॥

अथ चत्वारः शुद्धभृगवः ॥ यस्काः ॥१॥ मित्रयुजः ॥२॥ वैन्याः ॥३॥ शु
नकाश्चेति ॥४॥ एते चत्वारः ॥ तत्रादौ यस्कगणः ॥ बौधायनसूत्रे ॥
यस्काः० मौन० मूक० वाधुल० वार्षपुष्पः० मापः० राजसेनु० मथिर० दे
वंताय० जैवंतायन० वाकलायन० माध्यमेय० वासय० कौशांबेय० कौ
टिल्य० सात्यकेय० कौबिल्य० सात्यकपः० चित्रशेनः० भागुंतः० ला
के रेभ्यकेयः० आरम्यिः० औगुः० चितनयः० भागुरिः० वीतहव्यः० लौ
वंतायनः० अर्थलोरिवः० अर्थलेखि० भागलेयः० भाविलायः० कौशां
बयः० वशाश्वकि० प्रवारेय० गोरिक्षित० दैर्घ्यचित० पंचालव० पौ
ष्णावतार० सौदामना० इसेते ॥ आश्वलायनसूत्रेषु ॥ मौनस० मौ

॥१॥

काः० शार्कराक्षि० सानुष्टि० शालंकायनि० जैवंसायनि० एते यस्काः ॥
तेषां त्र्यार्षेयः ॥ भार्गववैतहव्यसावेधसेति ॥ एषां मिथो नान्वयः ॥
इति प्रवरकौस्तुभे यस्कगणश्चतुर्थः ॥४॥ अथ मित्रयुजो गणः ॥ आ
पस्तंबसूत्रे ॥ मित्रयुजः० रौक्षायण० नाक्षार्यजना० शैप्यायन० शा
रवंउन० सुभिनेय० महाबाल्य० स्तांड्यायण० औक्षायण० वालायण०
उद्दालायण० माजायण० वैतवातायन० स्वालायन० साक्षित० क्ष्माकि
य० अप्यसापो० क्रोपायन० गोक्षायन० अपिशायन० अहिकायन०
हासजिह० आच्छिकायन० इत्येते मित्रयुजो मित्रगवो मित्रयुवो पि
तेषां त्र्यार्षेयः ॥ भार्गववाध्र्यश्वदिवोदासेति त्रयः ॥ एषां मिथो ना

॥२०॥

न्वयः॥ आश्वलायनसूत्रेषु वाध्र्यश्वमित्रयुजोस्तेषां मेकार्षेयः॥ वाध्र्य
श्वेति॥१॥ इति प्रवरकौस्तुभे मित्रयुजां निर्णितः॥१॥ अथ वैन्याः॥ ३॥
वैन्य॰ पार्थ॰ यास्क॰ ल॰ एषां त्रयः॥ भार्गव वैन्य पार्थेति त्रयः॥ इति प्र॰
वैन्यगण द्वितीयः॥ ३॥ अथ शुनकगणः॥ बोधायनसूत्रे॥ शुनक॰
गात्समद॰ यज्ञपय॰ सुगंधय॰ रवार्दभायण॰ गांगायण॰ मत्स्यग
ध॰ गार्भायण॰ श्रोत्रिय॰ नैतिरिय॰ मांसगंध॰ मत्स्यगंध॰ यज्ञपय॰
प्रस्कष॰ प्रस्कल॰ शौनक॰ सौक्षि॰ सौगंधय॰ राजबंधक्य॰ शान्त्या
यन॰ कार्दमायनि॰ श्रोणि॰ चक्ष इति॥ कात्यायनसूत्रे॥ याजपय॰
सौकर॰ कर्दमायण॰ कृक्षि॰ गृत्समद॰ इत्येते शुनकास्तेषां मेकार्षेयो

॥२०॥

शौनकेति॥ गार्त्समदेति वा॥ भार्गव गार्त्समदेति द्वौ वा॥ भार्गवशौ
नक गार्त्समदेति त्रयो वा॥ भार्गवशौनहोत्र गार्त्समदेति त्रयो वा॥ एषां
शुनकानां कात्यायनादिसूत्रकारैः विकल्पेन यद्यपि बहुधा प्रवरा उक्ताः॥
अतो भिन्नप्रवरत्वात्परस्परं विवाहो इष्ट इति चेत्॥ न॥ कुतः॥ भृगोर
पत्यं शुनकस्तदपत्यं शुनहोत्रस्तदपत्यं गृत्समदस्तदपत्यं शौनक इत्ये
के भिन्नं प्रवरत्वेनउक्ताः तथापि भृगोरपत्यत्वेन एकोदरभ्रातृत्वेनु
न्यस्योक्तो गाधि कात्यायनादिसूत्रकारैः सर्वेषां शुनकानां अन्यो
न्यमविवाह उक्तस्तथा॥ सूत्रांतरेऽधिके गणद्वयमुक्तं॥ वेदविश्व
ज्योतिषां त्र्यार्षेयः॥ भार्गव वेद विश्वज्योतिषेति॥ पाठरमाठराणां

त्रयः॥ भार्गवशाठरमाठरेति॥ यस्कमित्रयुवो वैन्याः शुनकास्स्वगणं वि
ना॥ विवाहस्तु रन्योन्यं पूर्वोत्तरगणे स्तथा॥ २॥ जामदग्न्यैर्द्वयोर्वैर्वि
वाहोस्ति परस्परं॥ जामदग्न्ये भार्गवैश्च विवाहोस्ति परस्परं॥ २॥
इति वृष्णासजराघवसूनुना गणेपाठकेन विरचिते प्रवरकौस्तुभे
शुनकगणो निर्णितः॥ ४॥ एवं भृगोः सप्त गणाः कथिताः॥ ७॥ छ॥
अथांगिरसां गणानामंतर्गणाः षोडश॥ तत्र गोतम आंगिरसः स
प्त॥ भरद्वाजांगिरसश्चत्वारः॥ शुद्धांगिरसः पंच॥ एवं षोडश॥
तत्रादौ गोतमांगिरसाः सप्त॥ आयास्याः॥ १॥ शारद्वताः॥ २॥ कौमं
डाः॥ ३॥ दीर्घतमसः॥ ४॥ औशनसाः॥ ५॥ कारेणुपालयः॥ ६॥

॥१९॥

वामदेवाश्चेति सप्त॥ ७॥ तत्र आयास्यगणः॥ बौधायनसूत्रे॥
आयास्याः० श्रौणीवय० मूढरथ० सत्यकप० स्वेदह० कौमारवत्स०
लौडि० दार्भि० सात्यमुग्री० देवकी० कौरय० चौभ्य० नैकरि० स्वसै
बिकि० किल्लालय० कारुणि० कहोदरि० कासि० काक्षीय० इत्ये
ते आयास्यगोतमाः तेषां त्रयः आंगिरस आयास्य गोतमेति॥
इति प्रवरकौस्तुभे आयास्यगोतमप्रथमः॥ १॥ अथ शारद्वतो गणः॥
शारद्वत० भिलिन० रौहिणय० क्षीरकरंभ० सौमूचाय० सुयामुन० कै
शपिंदव० राहूगण० गणप० इत्येते शारद्वतगोतमास्तेषां त्रयः॥ आंगि
रसगोतमशारद्वतेति॥ इति प्रवरकौस्तुभे शारद्वतगोतमो द्वितीयः॥ २॥

अथ कौमंडगौतमः॥ कौमंड॰ मानि॰ परेषय॰ सुराल्ति॰ काष्टरेषय॰ ओजा
नायण॰ वाजायन॰ इत्येते कौमंडगौतमास्तेषां पंच॥ आंगिरस औ
तथ्य काक्षीवंत गौतम कौमंडेति॥ तेपंच॥ इतिप्रवर कौरूभे कौमं
डगौतमस्तृतीयः॥३॥ दीर्घतमसां पंच॥ आंगिरस औतथ्य का
क्षीवंत गौतम दीर्घतमसेति॥ आपस्तंबसत्रे त्रयोवा॥ आंगिरस
औतथ्य दीर्घतमसेति॥ इति त्रयः॥ इतिप्र॰ दीर्घतमस गौतमश्च
तुर्थः॥४॥ अथ औशनसाः॥ औशनसा॰ उदीच्यः॰ प्रशस्त॰ सुरू
पाक्ष॰ महोदर॰ विकंहत॰ सुबुद्धि॰ अनिहत॰ इत्येते औशनस गौत

मास्तेषां त्रयः॥ आंगिरस गौतम औशनसेति॥ इतिप्र॰ औशनस गौ

तमपंचमः॥५॥ अथ कारेणुपालयगणः॥ कारेणुपालय॰ वास्तव्य॰
वामदेव्य॰ श्वेताय॰ पैंडिष्ट॰ औदजनस॰ माधुक्षार॰ भजगंध॰ इत्ये
ते कारेणुपालय गौतमास्तेषां त्रयः॥ आंगिरस गौतम कारेणुपा
लिति॥ इतिप्र॰ कारेणुपालय गौतमाः षष्ठः॥६॥ अथ वामदेवगौ

तमगणास्तेषां त्रयः॥ आंगिरस वामदेव गौतमेति॥ कात्यायनलौ
गाक्षीसत्रयोरूः॥ औतथ्य॰ तौलेय॰ अभिजित॰ नैकि॰ लौगाक्षि॰
करभोगिणि॰ क्षीर॰ कंडू॰ वट॰ कूर॰ सैंधव॰ सांकर॰ मामीन॰
पौविंडि॰ भाग॰ लुंड॰ वल॰ करोट॰ कर॰ वारि॰ उपबिंदु॰ उपधर्षेय॰
राहितायन॰ भागायन॰ कात्स्य॰ उष्ण॰ अरुणय॰ पार्थिव॰ मादल

यन॰ कार्दसार॰ कौरिलायन॰ रोहित्स॰ नीपय॰ वासमूलय॰ वासपुष्प॰
वासंधूप॰ वासस्तेय॰ वासु॰ कान्वाक्षि॰ क्षपाचि॰ रिषि॰ कूराल्लि॰
इत्येते औतथ्य गौतमास्तेषां त्रयः ॥ आंगिरस औतथ्य गौतमेति ॥
सूत्रांतरेष्वन्येपि सप्त गौतमाः ॥ ७ ॥ तथाहि ॥ आपस्तंबसूत्रे ॥ ॥
औशिज गौतमास्तेषां त्रयः ॥ आंगिरस औशिज काक्षीवंतेति ॥ १ ॥
गौतमाश्चसूत्रे ॥ आयास्या शिज गौतमानां पंच ॥ आंगिरस आ
यास्यौ शिज गौतम काक्षीवंतेति ॥ २ ॥ गौतमानां आंगिरस औत
थ्य गौतमेति त्रयः ॥ ३ ॥ आश्वलायनसूत्रे ॥ राहुगणानां त्रयः ॥ आं
गिरस राहूगण गौतमेति ॥ ४ ॥ सोमराजकानां त्रयः ॥ आंगिरस सो

मराजक गौतमेति ॥ ५ ॥ वृहदुक्थानां त्रयः ॥ आंगिरस वृहदुक्थ गौ
तमेति ॥ ६ ॥ काक्षीवतानां पंच ॥ आंगिरस औतथ्य गौतम औशि
ज काक्षीवतेति पंचार्षेयः ॥ ६ ॥ दीर्घतमसां त्रयः ॥ आंगिरस औत
थ्य दीर्घतमसेति त्र्यार्षेयः ॥ ७ ॥ इह सर्वेषां गौतमानां अन्योन्य
म विवाहः ॥ गोत्रप्रवरैक्याच्चेति ॥ सर्वेपि गौतमगणा नान्ययं
ति परस्परं ॥ गोत्रप्रवरयोरैक्यादुद्वाह्यास्तु गणांतरैः ॥ १ ॥ इति
श्रीकृष्णात्मज राघवसूनुना गणेशपाठकेन विरचिते प्रवरकौ
स्तुभे आंगिरसगणे सप्त गौतमा निर्णीताः ॥ ७ ॥ अथ भरद्वाजा
श्चत्वारः ॥ भरद्वाजा रौक्षायणा गर्गाः कपय इति ॥ एते चत्वारः ॥

वौधायनसूत्रे॥भरद्वाज॰क्षाम्यायण॰मंगउ॰देवाश्व॰उद्दूहव्य॰प्राग्वेश्रा॰
देवहल॰भरद्ध्याग॰वसनायल॰नैदेह॰ओश्रा॰आश॰भूरय॰परिधय॰केश्रा॰
रेवय॰शौद्धेय॰उरूरु॰स्वारग्रीवय॰ओपसय॰वय॰असिद॰अग्निवेश्य॰
शठ॰गौरिव॰लैखायन॰स्तनकर्ण॰रुक्षमणि॰कद्रोदक॰भिद्यश्व॰उज्व
लय॰लौक्षिलय॰पैल॰स्वारूरु॰देवर॰भैरूड॰भद्राय॰सौरभर॰शुंगव॰
देवमतय॰इक्ष्मूमतय॰औदमेघ॰वेदोत्तम॰वाहणेय॰कल्माष॰राजस्तं
बि॰घोपस्तल॰पराहरय॰वल्मीक॰रुद्रांगपथ॰शालादि॰हय॰वेद
वेल॰भृग्यायन॰रोलायन॰शार्दूलय॰कालाक्ष॰बाष्कल॰सत्यकेय॰
कांडायन॰कौंडिन्य॰ब्रेम्हस्तंब॰राजस्तंभ॰अग्निस्तंभ॰वायुस्तंभ॰॰

॥९४॥

सूर्यस्तंभ॰सोमस्तंभ॰विष्णुस्तंभ॰इन्द्रस्तंभ॰आपस्तंभ॰येचान्येस्तं
बराद्वाइति॥अरण॰सिंधु॰कौमुदगंधि॰शिखायन॰अत्रियायण॰
भामायण॰कुक्ष॰कौकक्षय॰नैतुंतप॰दार्भय॰श्यामेय॰मत्स्य॰क्रथ॰
कारूणायन॰कारूथय॰कारिखायन॰कावल्येति॰आत्रेयायुनि॰मा
र्कंडि॰वासीनायनि॰उपद॰सौगेय॰याज्ञवेश्य॰नास॰खारी॰सार
खरी॰वाहा॰सौंगी॰उपाकुर्णी॰प्रवाहणेय॰आश्वकायनि॰वाचश्रौंगी॰
अधिकार॰ग्रीवि॰मैथुनमनि॰साष्टकि॰वार्षिकि॰कायन॰सात्यकि॰
त्रैतुटि॰धोरि॰धौताचकि॰सामस्तंबी॰ब्रम्हस्तंबी॰तोल्वली॰लोघुली॰
वेलुगा॰द्वेबिणा॰सालुटि॰वालु॰सौसुद्धिका॰भरद्वाज॰मौदमेद्धि॰

मपेद॰सुमति॰देवागारिधि॰देवस्थानि॰हरिणकर्णि॰आंगविधोस्यः॥
कौमोदगंधि॰सात्यमुग्री॰माद्विती॰कमालहर॰हारोपार॰गांगोदक्षि॰क्षौर
होत्री॰क्रौजैत्री॰जह्ववस्तानय॰कण्यव॰जालि॰रापस्तंबी॰सौजपृश्नि॰
पौलि॰खांखलायन॰अग्निवेश्य॰इत्येते कात्यायनलौगाक्षिभरद्वाजा
स्तेषां त्र्यार्षेयप्रवरो भवंति॥आंगिरसबार्हस्पत्यभारद्वाजेति त्रयः॥
एषां अन्योन्यमविवाहः॥इतिप्रवरकोस्तुभे आंगिर भरद्वाजांगिरसग
णे भरद्वाजगणः प्रथमः॥१॥ अथरौक्षायणः॥आपस्तंबसूत्रे॥आंगि
रस॰रौक्षायण॰कपिल॰गार्गिल॰गावल्न॰कौथुम॰अग्निजिह्न॰वैश्य॰
वैक्षारायणी॰भरद्वाज॰बिभिंडि॰कर्णसुत॰ऋक्ष॰इत्येते रौक्षायणाः

॥१५॥

स्तेषां पंचार्षेयः॥आंगिरसबार्हस्पत्यभरद्वाजवांदनमातवचसेति॥
आश्वलायनसूत्रे॥रौक्षायणानां त्र्यार्षेयोवा॥आंगिरसवांदनमात
वचसेति त्रयः॥इति प्रवरकौ॰आंगिरसांतर्गतभरद्वाजगणे रौक्षायणो
द्वितीयः॥२॥ अथकपयः॥लौगाक्षिसूत्रे॥खेलायन॰ऐतिशायन॰
एवंजालि॰तरश्विनि॰भाति॰कासवरवर्ण॰आमोषि॰सागसरे॰पोथ॰
दंडी॰शाक्ति॰पतंजलि॰भूयसीति॰वरंधि॰श्वत॰किरध्वा॰सुराज॰
कौशि॰कलाशि॰कटकोरिरयो॥वान्यायनाः॥कात्यायन॰भरद्वाज॰
कपय॰एतेकपयः स्तेषां त्रयः॥आंगिरसामहेयऋष्येति त्रयः॥बौ
धायनसूत्रेतु॥कपि॰कुलसी॰सासवी॰संश्रपि॰जलसिंधि॰मात्स्या

यन॰ मौखितकि॰ बिदि॰ दंडी॰ सकी॰ शाली॰ शाकि॰ भूयसी॰ सौजरी॰ श
डकेशीभोज॰ सिच॰ कपीतरु॰ स्वस्तीतर॰ जलंधक॰ पुष्पीलक॰ बिदु॰
पुध्वस्त॰ कण्व॰ वान्यायन॰ वात्स्यायन॰ तैतिरायण॰ नैतिशायन॰
करीरय॰ भ्राजिन॰ तरश्विम॰ तांडिन॰ कथ॰ कपय॰ शारकापरिये
ते कपयः॥ क्रोडि॰ कौलि॰ कौडि॰ दामी॰ कारी॰ भागी॰ बाधूनय॰ भ्रा
जनाक्षय॰ सखीनय॰ होत्रापचय॰ सत्तापचय॰ नय॰ गर्गाः इत्येते
गार्गास्तेषां पंचार्षेयः॥ गर्गशानिभरद्वाजवार्हस्पत्यांगिरसेतिपंच॥
एषां आपस्तंबसूत्रे त्रयो वा॥ आंगिरसगर्गसैन्येति त्रयः॥ आश्व
लायनसूत्रे तु॥ आंगिरसतैतिरिकपिभुवेति त्र्यार्षेयो वा॥ कात्यायन

॥१६॥

केशामथ॰ वाच्यतयन॰ भ्राष्टु॰ कटु॰ भ्राष्टमति॰ रोकलि॰ शालंकायन॰ कौला
श्वक्रिय॰ चाक्रीव॰ कौलोद्दलु॰ मातुल॰ गिराप्म॰ कर॰ प्रज्ञोग॰ पैंजला
यण॰ श्याम॰ श्यामायन॰ गार्ग्य॰ संपरिवार॰ इत्येते गार्ग्याः॥ लौगाक्षि
कात्यायनिसूत्रीयाः॥ तेषां त्र्यार्षेयः॥ आंगिरसशानिगर्गेति॥ लौगाक्षि
सूत्रे अन्ये पित्रिप्रवरा उक्ताः आंगिरस आमहय्या उरुक्षय्येति त्रयः॥ आं
गिरसबार्हस्पत्यभारद्वाजेति वा॥ आंगिरसवार्हस्पत्यकपेति त्रयो वा॥
इति प्रवरकोस्तुभे आंगिरसान्तर्गतभरद्वाजगणे कपयस्तृतीयः॥ ३॥
अथ गर्गाः॥ बौधायनसूत्रे॥ गर्गाः सांभरायणाः॰ सखीनय॰ गंध
रायण॰ वाहूलंक॰ भ्राष्टविदव॰ क्रोष्टविदव॰ सौयामुन॰ भाग॰ नाक्षय॰

हांत्रापच्यय॰सत्यापच्यय॰वत्स॰चतुरायण॰कण्यापनः सांस्मायण॰का
नायन॰केवलायन॰श्रोआयन॰वात्साम्मन॰पैल्व कायन॰वश्वापकाय
न॰श्रारायण॰रूणमायण॰मधुरावह॰मधुरावर॰सांभर॰भारमत॰सं
परिवार॰प्रोत्सतर॰वरंत॰भ्राष्टरूत॰लोपरूतू॰भालाविलू॰ऐंदभा
गुंल॰भाष्टविदि॰श्रालंकायनि॰बालाकि॰बाहुलकि॰क्रोष्ट्रि॰तथाहि॰
तैत्तिरि॰कपिभूमि॰खंदित॰ खंडित॰ इत्येते गर्गाः तेषां त्रयः॥ आं
गिरससैन्यगर्गेति त्रयः॥ आंगिरसतैत्तिरिः कपिभूमीत्यन्ये॥ एषां
चतुर्णां भरद्वाजानां अन्योन्यमविवाहः॥ गोत्रप्रवरैक्यत्वात्॥ भार
द्वाजाश्च रूक्षाश्च गर्गाश्च कपयो मिथः॥ चत्वारो हि भरद्वाजा गो

॥१७॥

त्रैक्याच्चान्वयं मिथः॥१॥ इति श्री कृष्णात्मज राघवसूनुना भपेश्रपार
केन विरचिते प्रवरकोस्तुभे आंगिरसांतर्गत भारद्वाजगणे गर्गचतु
र्थः॥४॥ अथ शुद्धांगिरसां पंच॥ तथाहि॥ विष्णुवृद्ध कण्व रथीतर
हरित मुद्गलाश्चेति॥५॥ तत्रादौ विष्णुवृद्धः॥ बौधायनसूत्रे॥ विष्णु
वृद्ध॰शाठ॰मरण॰भद्रायण॰बादरायण॰मत्स्यप्रयण॰सासश्वि॰
सासकायन॰नैजुंघ॰तुत्ल॰भारूण्य॰वेस्य॰देवस्थ॰इति॥ आपस्तं
बसूत्रे तु॥ ओपमन्यव॰औपगवि॰सर्पि॰सात्विकि॰आध्यात्मिकि॰
नत्कैदि॰एतो विष्णुवृद्धाः तेषां त्रयः॥ आंगिरस पौरुकुत्स त्रसदश्वे
ति त्रयः॥ इतिप्र॰शुद्धांगिरसांतर्गत शुद्धांगिरसगणे विष्णुवृद्धांगिरसप्र॰॥१॥

अथकण्वाः॥ बौधायनसूत्रे॥ कण्व॰ सौयम॰ कटायन॰ बाष्कल॰ पौ
ल॰ दलिन॰ मांजि॰ भ्राजेय॰ माजि॰ गंध॰ वाजि॰ वाजिश्रवस॰ इत्ये
तेकण्वाः॥ तेषांत्रयः॥ आंगिरस आजमीढ कण्वेति॥ आंगिरस आ
जमीढ घोरकण्वेतिवा॥ इतिप्र॰ कण्वगणोद्वितीयः॥२॥ अथहरि
ताः॥ बौधायनसूत्रे॥ हरित॰ सांख्येय॰ दर्भ्य॰ भैनगव॰ मतायु॰
बलादर॰ महोदर॰ नैमिश्रेय॰ मिश्रेयव॰ कौलप॰ करिष्यय॰ पैलेय॰
पैंउल॰ माधुप॰ मांधाल॰ मांउक इति॥ आपस्तंबाश्वलायनसूत्रयोस्तु॥
कुत्स॰ शंख॰ दर्भ॰ भैम॰ गव॰ पैंग्य॰ पालाश॰ इत्येतेहारिताः तेषां
त्रयः॥ आंगिरसांबरिषयौवनाश्वेति॥ आपस्तंबसूत्रेतु॥ मांधा

त्रांबरीषयौवनाश्वेति॥ त्रयोवा॥ इतिप्र॰ हरितगणस्तृतीयः॥३॥
अथरथीतराः॥ बौधायनीयेमहाप्रवरे॥ रथीतरः॰ अतिदासीक॰ नैतिरक्षय॰ शैलालय॰
भैलौ॰ भायन॰ सावह॰ भैक्षावह॰ हेमगव॰ इत्येतेरथीतराः येषांत्रयः॥ आंगिरस
विरूपरथीतरेति॥ आंगिरसविरूपपार्थिवेतिवा॥ आपस्तंबसूत्रे अन्यत्रयः॥
विश्वरूपरथीतरास्तेषांत्र्यार्षेयः॥ आंगिरसवैरूपपार्श्वदश्वेति॥ इतिप्रव॰
रथीतरगणश्चतुर्थः॥४॥ अथमुद्गलांगिरसः॥ हिरण्यस्तंबी॰ हिरण्याक्ष॰ हि
रण्यगर्भ॰ कर्षभासित॰ करूण्यायन॰ दीर्घजंघ॰ तारणबिंदि॰ सात्यमुग्रि॰
छन्दहय॰ मुद्गल॰॥ एषांमुद्गलानांत्रयः॥ आंगिरसभार्म्यश्वमौद्गलेति॥
आपस्तंबसूत्रेतुमराएषांत्र्यार्षेयोवा॥ तार्क्ष्यभार्म्यश्वमौद्गलेति॥ इतिप्र॰

॥१९॥

मुद्गलांगिरसश्चंचुर्षिः॥५॥५॥एषां विष्णुवृद्ध कण्व रथीतर मुद्गल हरितानां म
न्योन्यमविवाहो दृष्टः॥स्वस्वगणे तु नास्ति विवाहः॥पंचांगिरसः कण्व विष्णु
वृद्ध रथीतराः॥हरितमुद्गलौ न्योन्यं वैवाह्यः स्वगोणं विना॥६॥सूत्रांतरे च
न्येपि केवलांगिरस उक्ताः॥तथाहि॥बोधायनसूत्रे॥कुत्सानां त्रयः॥आंगि
रसमांधातृ कौत्सेति॥आंगिरसमांधातृ भाम्यश्वेति वा॥एषां हरितैरवि
वाहः प्रप्रवरसाम्यात्॥पृषदश्व॰ अंगुष्ठ॰ वैरूप्य॰ अष्टादंष्ट्र॰ रथीतर॰
एषां त्र्यार्षेयः॥आंगिरस पार्श्व दश्व वैरूप्येति॥आंगिरस विरूप रथीत
रेति वा॥अष्टादंष्ट्र पार्श्व वैरूप्येति एते त्रयः लौगाक्षिसूत्रे॥एषां रथीत
रैरविवाहः प्रवरसाम्यत्वात्॥हरितकुत्सयोर्नास्ति विवाहः प्रवरैक्यतः॥

॥१९॥

प्रवरैक्यान्न विवाह्यौ पृषदश्व रथीतरौ॥१॥चत्वारो हि भरद्वाजा गौतमाः
सप्त पंच च॥पंचांगिरसो ह्येवं वैवाह्या ऽन्यगणैः सह॥२॥तत्र तु यद्यपि द्वि
विधो गर्ग उक्तः॥एकस्त्रिप्रवरात्मको द्वितीयः पंचप्रवरात्मकोस्तथा
पि सर्वे भरद्वाजैः सह नान्वयः॥एवं द्विविधेनापि कपीनां साकं भारद्वाजै
र्नान्वयः॥कुतः॥बहुग्रंथविरोधादिति॥संग्रहवाक्यानि कपीनां॥भर
द्वाजकपीनां तु प्रवदंति मिथोन्वयं॥निबंधिनो हि नेच्छंति सर्वे नारायणा
दयः॥१॥भरद्वाजस्तु गर्गैश्च कपिभिः सह गोत्रता॥सप्तर्षित्वादनुद्वाहः
सिद्धरूपः परम्यते॥२॥केचित्तु आंगिरस आमहीय रौक्षय सप्रवरस्य
कपेर्विष्णुवृद्धादिवत् केवलांगिरसत्वं स्वीकृत्य भरद्वाजैः सह

न्वयंभिघंति॥ तन्नादर्शितव्यं॥ गोत्रप्रवरमंजरीकारप्रयोगपारिजातस्मृत्य
र्थसारादिबहुग्रंथविरोधात्॥ अतः सर्वभरद्वाजैः सार्कं कपिनाद्विविधेना
पि गर्गेण न विवाहोस्ति॥ इति श्रीकृष्णात्मजरघुनाथसूनुना गणेशपाठकेन
रचिते प्रवरकोशे भेदोऽङ्गिरसो निर्णीताः॥२॥ अथात्रिगणः॥ तत्रां
तर्गतश्चत्वारो भेदाः॥ तथाहि॥ आत्रेयो गविष्ठिरा मुद्गलकाः सुऊताश्चेति॥४॥
एते चत्वारः॥ तत्रात्रेय प्रथमः॥ आपस्तंबसूत्रे॥ भूरय० घांदिनि० छं
दि० योछिक० मौऊलय० सोपाघराल० छागल० तणबिंदु० भागंतय० मा
लरुच० व्यालय० सावच्यय० कामायनि० दाक्षी० औदह० गणपतय०
औदालकि० मङ्गोणि० भव० गौरिश्रिय० गविष्ठिर० शिशुपाल० कृष्णा ॥२०॥

त्रेय० गौरात्रेय० नीलात्रेय० कृष्णात्रेय० श्वेतात्रेय० श्यामात्रेय० महात्रेय०
दत्तात्रेय० सौत्रेय० वामरथि० चैतभाव० शौद्रेय० कौद्रेय० गोपवह० कैला
पय० अनीलायन० अभिमति० दैरंगी० सौंगी० गौरंगी० पुष्पायसे० रा
ष्यय० कैलायन० भारद्वायन० इन्द्रातिथिः० कैवलात्रेय० इति॥ कामा
यनि० शिषरय० इषस्त० हरयश्रेय० अहायन० वामरथ्य० शौलकर्णि०
रथस० श्वेतय० कौरश्मिवि० कौराजरथ० जैत्रायन० विद्वान्० जात०
विवाहमित्र० जानुकि० खौलेय० वालेय० आत्रेय० नजन० नाभाग०
मादयन० सोपुष्पय० छंदोगि० इत्येते अयस्तेषां त्रयः॥ आत्रेयाची
नानदाद्रूयावाश्चेति॥ एषामन्योन्यमेव विवाहः॥ इति प्र० अत्रिगणे आत्रेयप्र०॥१॥

अथगविष्ठिराः॥ लौगाक्षिसूत्रे॥ दक्षि०व्यलि०स्वर०अर्णिदल॥ भालंदन०
अर्णनाभि०बैजवापि०बंब०श्टंगी०मौंजिकेश०गविष्ठिर०चंद्रात्रेय०पू
ष्टि०दृष्टि०पार्ष्णि०वृष्णशीर्षक०एतेगविष्ठिराः॥ एषांत्रयः॥ आत्रेयगवि
ष्ठिरपौर्वातिथेति॥ आपस्तंबसूत्रे अन्यत्रयो वा॥ एते॥ आत्रेयार्चनानसगा
गविष्ठिरेति॥ इतिप्र०अत्रिगणेगविष्ठिरोद्वितीयः॥२॥ अथाह्नुतकानां
त्रयः॥ आत्रेयार्चनानसाह्नुतकेति॥ इतिप्र०अह्नुतकस्तृतीयः॥३॥ अथ
मुद्गलाः॥ बोधायनसूत्रे॥ मुद्गल०व्यलि०संधि०अर्णव०गविष्ठिर०बैत
वाह०सरीशय०शालमन०गौरीवत०गौरकेय०वायनन०इत्येतेमुद्ग
लाः॥ एषांत्र्यार्षेयः॥ आत्रेयार्चनानसपौर्वातिथेति॥ अत्रिमुद्गलश

॥२३॥

वाश्वेतिवा॥ सूत्रांतरे अतिथिनांत्रयः॥ आत्रेयार्चनानसातिथेति॥
एषांसर्वेषामत्रिणामन्योन्यमविवाहः॥ अत्रिणामपिसर्वेषांनविवाहो
स्तिपरस्परं॥ गोत्रप्रवरयोरैक्याद्वामरध्यधनंजनैः॥४॥ इतिश्रीवृ
ध्यात्मजरघुनाथसूनुनागणेशपाठकेनरचितेप्रवरकोशेऽभआत्रेयानि
र्णिताः॥४॥ अथविश्वामित्रगणः॥ तत्रांतर्गणादशभेदाः॥ तथाहि॥
कतजापूरणाइंद्रकौशिकाश्चधनंजयाः॥ कुशिकारोहिताःकामान
याघमर्षणरौक्षिकेति॥ एतेदश॥१०॥ तत्रादौकुशिकभेदः॥ कात्याय
नापस्तंबसूत्रयोः॥ कुशिका०पार्णजघ०वारक्य०औदलि०माणि०ष्टह
दग्नि०आलंदि०अचहि०कामांतक०विभिषाल०बंधकथ०माकायन०

॥२२॥

सांक्रायण॰ लौक॰ गौर॰ सौगनध्य॰ यमदूत॰ अनभिम्न॰ तारकायण॰ याज्ञवल्क्य॰
विद्दु॰ अनुवलय॰ सौश्रुतय॰ औवनलय॰ भाजव्य॰ शामेय॰ चैत्रेय॰ सालो
चन॰ मयूर॰ सौमस॰ चित्रलव॰ घन॰ नैभ्यभूत॰ नव॰ मांतव्रत॰ बाभ्रव्य॰ का
ल॰ ॥इति॥ आश्वलायनसूत्रे च॥ विश्वामित्रं॰ देवरात॰ चिकिति॰ मनु॰
वल॰ गालव॰ सांकृत्य॰ किरार॰ किरात॰ कुशिक॰ उलुप॰ बृहदग्नि॰ बभ्रू
शाल॰ शालंकायन॰ कालावयव॰ जाबालु॰ सैंधवायन॰ ॥इति॥ लौगा
क्षिसूत्रे मत्स्यपुराणे॥ मनु॰ सांकायन॰ गौरि॰ उत्सर॰ गोभिल॰ गोकर्णि॰
गोप॰ घेन॰ कालीय॰ शारत॰ बाभ्रव्य॰ पयकर्षि॰ सौश्रस॰ सौसुत॰ गो
ळब्धि॰ ॥इत्येते कुशिकाः॥ एषां त्रयः॥ विश्वामित्र देवरात औदलेति॥

॥२२॥

एते त्रयः॥ इति प्र॰ विश्वामित्रगणे कुशिकः प्रथमः॥१॥ अथ रोहिताः॥
बौधायनसूत्रे॥ रोहिताः॰ लोहिता॰ दंउका॰ चाक्रूरणायन॰ वासेव॰
अष्टक॰ ॥एते लोहितास्तेषां त्रयः॥ विश्वामित्राष्टक रोहितेति॥ आश्व
लायनसूत्रे॥ एषां विश्वामित्ररोहिणेति द्वौ प्रवरौ वा॥ विश्वामित्र माधुछं
दसाष्टकेति वा॥ विश्वामित्राष्टकेति द्वौ वा॥ इति प्र॰ विश्वामित्रगणे रोहि
तद्वितीयः॥२॥ अथ रोक्षकाः॥ बौधायनीये॥ रौक्षक॰ वर्णोद्वह॰ बल॰
रेणव॰ वस्रव॰ ॥इत्येते रौक्षकास्तेषां त्रयः॥ विश्वामित्र रौक्ष रेणवेति॥
विश्वामित्र गाथी नरेणवेति वा॥ इति प्र॰ विश्वामित्रगणे रौक्षकस्तृतीयः॥३॥
अथ कामायनाः॥ सोमक॰ विश्वामित्र॰ देवश्रवस॰ एमति॰ ज्यामकायन॰

कामकायन॰ इत्येते कामायनास्तेषां त्रयः॥ विश्वामित्र देवश्रवस देवतरसेति॥
इति प्र॰ कामायनश्चतुर्थः॥४॥ अथाजः॥ अजानां त्रयप्रवराः॥ विश्वामि
त्राजमाधुछंदसेति॥ इति प्र॰ अजश्चपंचमः॥५॥ अथ धनंजयः॥ धनं
जयानां त्रयप्रवराः॥ विश्वामित्र माधुछंदस धनंजयेति॥ इति प्र॰ ध
नंजयषष्ठः॥६॥ अथाघमर्षणः॥ बंधुल॰ कामदंक॰ पार्थिव॰ पाणिल॰

॥२३॥

कौशिक॰ परिकुट्टि॰ चैत्रेय॰ अघमर्षण॰॥ इत्येतेघमर्षणास्तेषां त्रयः॥
विश्वामित्र माधुछंदसाघमर्षणेति॥ इति प्र॰ विश्वा॰ अघमर्षणः सप्त
मः॥७॥ अथ पूरणाः॥ पौरण॰ वारिधारि॰ धापयंत॰ वारिधावंत॰॥
इत्येते पूरणास्तेषां द्वौ॥॥ विश्वामित्र रोहिणाविति॥ एतौ द्वौ॥ त्रयो वा॥

॥२३॥

विश्वामित्र पौरण वारिधावंत इति॥ एते त्रयः॥ इति प्र॰ पूरणाष्टमः॥८॥
अथ कताः॥ औदुंबरि॰ शैशिलि॰ रैकायनि॰ लैकायनि॰ लौकायनि॰ ता
र्क्ष्यायनि॰ कात्यायनि॰ वत्सायनि॰ गादायनि॰ गंगायनि॰ आमोदाय
नि॰ मौंज्यायनि॰ मौंजहायन॰ कत॰ बौलाकि॰ शालंकायन॰ शौंग॰
शैशिरि॰ टैटिकि॰ कारिलादि॰ कात्यायन॰ रामाकरि॰ लानकि॰॥ इ
त्येते कतास्तेषां त्रयः॥ विश्वामित्र कत किलेति॥ विश्वामित्र कात्यायन
कात्यकिलेति त्रयो वा॥ इति प्र॰ विश्वा॰ कतो नवमः॥९॥ अथ इन्द्रकौ
शिकाः॥ बौधायनसूत्रे॥ इन्द्रकौशिकानां द्वौ॥ विश्वामित्र इन्द्रकौशि
काविति॥ कौशिकानां त्रयः॥ विश्वामित्राघमर्षण कौशिकेति त्रयः॥

इतिप्र० विश्वा० इन्द्रकौशिकोदशमः ॥१०॥ सूत्रांतरेष्वन्येपिदशधावैश्वा
मित्रास्सूक्ताः ॥ तथाहि ॥ रेणवः० कारेणव० गाथिन० हर्यश्व० इतरायण० ॥
एषांत्रयः ॥ विश्वामित्र गाथिनरेणवेति ॥ अजानांकुशिकानांत्रयः ॥ वि
श्वामित्र आश्मरथ्य वाधुलेति ॥१॥ शालंकायनानांत्रयः ॥ विश्वामित्र
शालंकायन कौशिकेति ॥२॥ रौहिणानांत्रयः ॥ विश्वामित्रमाधुछंदस
रौहिणेति ॥३॥ कथकानांत्रयः ॥ विश्वामित्रसाहुलमाहुलेति ॥४॥
हिरण्यरेतसांद्वौ ॥ विश्वामित्रहिरण्यरेतसाविति ॥५॥ सुवर्णरेतसां
द्वौ ॥ विश्वामित्रसुवर्णरेतसाविति ॥६॥ कपोतरेतसांद्वौ ॥ विश्वामि
त्रकपोतरेतसाविति ॥७॥ घृतकौशिकानांद्वौ ॥ विश्वामित्रघृत

॥२४॥

॥२४॥

कौशिकाविति ॥८॥ धनंजयानांत्रयः ॥ विश्वामित्रमाधुछंदसधनंज
येति ॥९॥ अन्यत्रयः ॥ विश्वामित्रमाधुछंदसाघमर्षणेतिवा ॥९॥ लोहि
तानांत्रयः ॥ विश्वामित्रलोहिताष्टकेति ॥१०॥ एतेदश ॥ एषांसर्वेषां
विश्वामित्रगणानामन्योन्यमविवाहः ॥ प्रवरैक्यसातं ॥ यावंताप्रवरे
ष्वेकोविश्वामित्रोनुवर्तते ॥ तावंतासगोत्रत्वाद्विवाहोस्तिपरस्परं ॥१॥
इतिश्रीकृष्णात्मजरघुनाथसूनुनागणेशपाठकेनविरचितेप्रवरकौस्तु
भेविश्वामित्रगणनिर्णिताः ॥४॥ अथकश्यपगणः ॥ कश्यपानांत्रयो
भेदाः ॥ तथाहि ॥ निध्रुवारेभाशांडिल्याश्चेति ॥ एतेत्रयोभेदाः ॥ सां
ख्यमित्राश्चत्वारोवा ॥ तत्रनिध्रुवप्रथमः ॥ बोधायनसूत्रे ॥ निध्रुवाः०

कश्यपः॰ अष्टांग॰ रेय॰ माठर॰ रोतिज्ञायन॰ अभूय॰ वेशिप्र॰ धूम्रायन॰ आम्रायण॰
ऐकपथ॰ प्रनर्ष॰ हृद्रोग॰ आताप॰ पाचामणि॰ कामिकायनि॰ सैधव॰ सायस्य॰
आसुरायण॰ घाग॰ व्यासि॰ मघ॰ स्थौलकेश॰ वार्द्धकेय॰ औपन्य॰ लाक्षायण॰
क्रोष्ट॰ लीयनय॰ स्वाद्रीयन॰ रोहितायन॰ मतिकुंभ॰ पिंगाक्षय॰ औउलेय॰ मार
यण॰ यवच॰ वैकर्णेय॰ कौपीकेय॰ धूमल॰ हायण॰ नसुर॰ गोरिवायन॰ महाचै
क्रेय॰ पैठीनस॰ पीनस्य॰ विपगण॰ भालंदन॰ सांख्यमित्र॰ हारीस॰ जारमेस्य॰
रमाणि॰ सानिश्चत॰ वेशंपायन॰ स्वैरकि॰ कासेलय॰ उकायनि॰ मार्जलायनि॰
कांसलायन॰ होता॰ सुचय॰ भागुरय॰ प्रथिकाय॰ गोमयन॰ हिरण्यवाकु॰ अग्नि

॥२५॥

देव॰ सौर्य॰ सुराल॰ आधिश्रोणि॰ उत्तरत॰ गउेषु॰ उदल॰ मंत्रित॰ वैकर्णिय॰

॥२५॥

स्थूलभिद्व॰ ॥इति॥ काश्यप॰ आत्रायण॰ मत्तस॰ वैकपय॰ नैकपय॰ भौवन॰
पैठीनस॰ सैंधव॰ प्रागाह॰ गायक॰ देवमात॰ सोमयाग॰ आयावय॰ उदगा
वी॰ आचन॰ हृद्रोग॰ काचायन॰ चक्रवर्मी॰ महाचक्रधर्मी॰ श्रेयण॰ शार्ङ्ग
रेय॰ दाक्षायण॰ अहास्ति॰ दासी॰ महर्षी॰ वात्स्यपर्णी॰ मूल॰ धूम्रायण॰
आश्र॰ वातायन॰ कौसदक॰ खगाद॰ अग्निशर्मायण॰ यमदूस॰ कैकराय॰
हिहायन॰ हस्वकश्यप॰ वद्धसारय॰ शास्त्रमित्र॰ सानुत॰ हरितायन॰ मा
तंग॰ सोमभूय॰ ॥ए तेकात्यायनलोगाक्षियानिध्रुवाः॥ एषां त्र्यार्षेयः॥
काश्यपावत्सारनिध्रुवेति॥ एषां अन्योन्यमविवाहः॥ इतिप्र॰ कश्यपगणे
निध्रुवप्रथमः॥१॥ अथरेभाः॥ रेभाणां त्र्यार्षेयः॥ काश्यपावत्साररेभेति॥

इति प्र॰ रेभद्वितीयः ॥२॥ अथ शांडिल्याः ॥ बौधायनसूत्रे ॥ शांडिल्याः॰
शांभवः॰ मैत्रेय॰ कोहल॰ पायक॰ शारवक॰ औदमेघ॰ सौदन॰ सावर्चस॰ कारेय॰
कौकृटय॰ नैत्रि॰ महाकय॰ कौपय॰ मौंजायन॰ जाणवंश॰ खर्वमान॰ मुंतायन॰
वात्स॰ भात्मय॰ गोक्षिल॰ वेदायन॰ वात्स्यायन॰ बहुदय॰ भागुरि॰ खर्दतिमुख॰ हि
रण्यबाहु॰ अरूदह॰ गोमूत्र॰ वाक्यशठ॰ जालंधरि ॥ इति ॥ कात्यायनसूत्रे तु ॥
संपवा॰ चाहुभि॰ उपलोध॰ जलंब॰ बहू॰ भीम॰ गर्दभीमुख॰ हिरण्यबाहु॰ तोरि

॥२६॥

णि॰ केशील॰ कोकील॰ बहुल॰ कुहल॰ मंगल॰ भगल॰ गहल॰ वक॰ खंड॰
उदमेघ॰ त्रणबिंदु॰ सुदानु॰ कौचलय॰ आंतरय॰ सुकेतु॰ शांखिल॰ वेदानव॰
सौदानव॰ पैप्पिल॰ यूपरि॰ सुकेश॰ तित्तिरि॰ मुञ्जायन॰ गंगायन॰ वारि॰ गा

॥२६॥

थिल॰ मयूर॰ सुजातपूर॰ पर्व॰ पपाम॰ जानवृष॰ खंड॰ कौरात॰ उदमेध्य॰
अत्रमेय॰ औदिग्यवर्ण॰ तृणबिंदुल॰ पैपलादि॰ संपाति॰ शांज॰ भुंजाजालि॰ ॥
इत्येते शांडिल्याः ॥ एषां त्रयः ॥ काश्यपासितदेवलेति ॥ आपस्तंबसूत्र
विकल्पेन बहुधा प्रवरा उक्ताः ॥ तथा हि ॥ काश्यपावत्सारशांडिलेति ॥
काश्यपावत्सारदेवलेतिवा ॥ काश्यपावत्साराग्नि नेतिवा ॥ शांडिल्याशि
तदेवलेतिवा ॥ आपस्तंबसूत्रे तु व्यार्षेयं वा ॥ देवलासिता विति ॥ ॥ केचि
तु सूत्रांतरे सांख्यमित्रश्चतुर्थ भेदः ॥ सांख्यमित्राः॰ शाकयः॰ रेफः॰ नुथ
वाहः ॥ प्रवरैक्यत्वात ॥ निधवारेभ शांडिल्याः सांख्यमित्राः परस्परं ॥ ना

न्वयंतिमिथोह्येते कश्यपाप्रवरैक्यतः ॥४॥ इतिश्रीकृष्णात्मजरघुनाथसू
नुनागणेशपाठकेन विरचितेप्रवरकौस्तुभेकाश्यपगण निर्णितः ॥५॥ अथ
वशिष्ठगणः ॥ वशिष्ठानां चत्वारोभेदाः ॥ वशिष्ठोपमन्यवःपराशराः कुंडि
नश्चेति ॥ एते चत्वारः ॥ तत्रादौ वशिष्ठ प्रथमः ॥ आपस्तंबसूत्रे ॥ तथा
हि ॥ वशिष्ठ० चेलकि० वाटकि० सारवल० गौरीश्रव० लायन० कपिशान० सौ
विटसि० व्याघ्रपाद० बाल्य० कायनि० गार्यनि० नयाव्य० जातूकर्ण्य० औधोचिं०
कौंभोजि० कौल्लायन० सुद० हरि० कांउवृद्धि० सोपवस्म० यज० आलंभायन० लोम
नि० आश्वस्लि० आकर्षित० पार्णवल्क्य० औदन० गोरव्य० विश्वंच० नावह० क
थय० आविकित० पोतस्व० भा०जय० पूतिमाष० सस० वेतशिखा० औपवन० ॥२७॥

औपगव० वैगल० सखलायन० पालाशाय० हरीलय० कुरयश्च० आयस्थूल०
शितिशाम० मायन्य० ब्रम्हपुरेय० स्वस्तिकर० कांउवेदि० मौउल० गोधिलि०
वौधिलि० गालाहुयी० सामत० सायन० ब्रम्हबलि० चौरिश्रवस्स० याज्ञवल्क्य०
पाणवल्क्य० ॥ इत्येतेवशिष्ठाः ॥ येषामेकार्षेयः ॥ वाशिष्ठेति ॥ इतिप्र० वशि
ष्ठगणेवशिष्ठप्रथमः ॥६॥ अथकौंडिन्याः ॥ लोहायन० जाजुलि० अन्यथ०
विर्णय० अविखर० अश्मरथ० वाल्हव० कौंकोल्य० सांगित० नाक० पस्व०
परकू० नयग्राम० हिरण्याक्ष० षेण० पैपलाम० भान्यक्षी० माध्यंदिन० शां
ल० सोम० मस्ती० औपेस्थल० स्वल० कलहय० भस्तिलप० पैपलादि० विध
कंकर्षि० त्रैश्रृंगी० मोकुली० मित्रावरुण० कुंडिन० कौंडिन्य० मैत्रावरुण०

गोपन॰ इत्येते कुंडिनानामेषां त्रयः॥ वाशिष्ठ मैत्रावरुण कौंडिन्येति॥ इति प्र॰
कौंडिन्यो द्वितीयः॥ २॥ अथोपमन्यवः॥ बौधायनसूत्रे॥ उपमनुः॥ औपग
व॰ मंडलेशाय॰ कपिंजल॰ गालस्तपोल॰ त्रैवेण॰ गिरिस्सार॰ क्षार॰ मौलय॰
महाकर्णायन॰ वालाशिखा॰ बलायन॰ भागुरि॰ स्थापन॰ कुंडिनोदरायण॰
लौहित्येय॰ काबांधय॰ वाध्र्यश्व॰ आस्तिरभ्य॰ आलवच॰ कपिकेश॰ प्रा
लंभायन॰ कात्यायन॥ इति॥ लौगाक्षिसूत्रयोस्तु॥ लालय॰ महाकर्णि॰
कौरव्य॰ त्रैवर्णि॰ कपिंजल॰ दावालसि॰ विभागर्णवित्तायन॰ शक॰ भरा
यन॰ लागलव्य॰ कौरवत॰ भागुरायण॰ शांकर्य॰ शांकपेय॰ औदलेय॰ श्या
य॰ सांख्यायन॰ रतरथ॰ माष॰ शाराव॰ दासकाय॰ गारथ॰ वासकव

॥२८॥

॥२८॥

य॰ आलंबायन॰ प्रालंबाय॰ औपमन्यव॰ सरक॰ सव्यसत्य॰ पादकायन॰ औ
पलेख॰ ब्रह्मचर्य॰ पार्णादि॥ इत्येते उपमन्यवस्तेषां त्र्यार्षेयः॥ वाशिष्ठा

२

भैद्वस्विंद्रप्रमदेति॥ इति प्र॰ उपमन्यवस्तृतीयः॥ ३॥ अथपराशराः॥ बौधा
यनसूत्रे॥ पराशराः॰ कहृतय॰ पांजय॰ वैमतायन॰ गोवाली॰ भालुकि॰ त्रै
वाजलि॰ कश्ाय॰ कौकलय॰ कैमति॰ कृष्णाजिन॰ कपिसर॰ खस्सायन॰
श्वेतपूरय॰ पैष्टसारादि॰ मार्गायनि॰ यथार्णय॰ श्रामेय॰ कृष्णपराशर॰
अरुणपराशर॰ नीलपराशर॰ श्वेतपराशर॰ श्यामपराशर॰ कद्रशाय॰
वाह॰ नय॰ जैय॰ नैमताय॰ गोपाणिनि॰ अविष्ठायन॰ श्यामेय॰ यास्कर॰
खर्दि॰ मांरुकी॰ बादरी॰ शौमि॰ कंभिन्य॰ परिग्रथ॰ शाबि॰ कृष्णाजिन॰

॥२९॥

आर्क्षर्य॰ वैराणि॰ राकन्यिस॰ पूर॰ तरणि॰ धूम्र॰ राद॰ ॥ इत्येते पराशराः॥ तेषां त्रयः॥
वशिष्ठशक्तिपराशरेति॥ एषां चतुर्णां परस्परमविवाहः॥ प्रवरैक्यत्वात्॥
पराशरावशिष्ठाश्च कुंडिनैः श्चौपमन्यवः॥ समानमुनिबाहुल्यान्नान्वयेति
मिथोऽन्वयः॥१॥ इति श्रीकृष्णात्मजरघुनाथसूनुना गणेशपाठकेन विरचिते
ते प्रवरकौस्तुभे वाशिष्ठगणनिर्णीताः॥६॥ अथागस्तीगणः॥ अगस्तेश्च
त्वारो भेदाः॥ एते॥ इध्मवाहाः॥१॥ सांभवाहाः॥२॥ सोमवाहाः॥३॥ यज्ञ
वाहाः॥४॥ एते चत्वारः॥ तत्रादौ इध्मवाहाः॥ तथाहि॥ बौधायनसूत्रे॥॥
अगस्त्य॰ विशालादि॰ यास्कलायन॰ औपदहन॰ कुल्माष॰ पंडिली॰ विनि
ल॰ आधवदय॰ पैरण॰ यशय॰ नैपथ॰ शाल्मातक॰ मौंजनक॰ पिंड॰ हत॰ वा

॥२९॥

रिग्रीव॰ रोहिणी॰ भामोसल॰ सौरव्यायन॰ प्राचार्य॰ शाली॰ हृद्रैणय॰ तंडि॰
दरि॰ अगस्ति॰ कल्माष॰ सौभर॰ पुत्री॰ कुल॰ शैव॰ युध॰ अर्बुद॰ वैरव्य॰
लावणि॰ वासकि॰ कुक्षि॰ साकाक्षि॰ रम्याक्षि॰ माधुराक्षि॰ गोव्यादि॰ उपकु
ल॰ दामोष्णीषे॰ क्षौमी॰ कसुकल॰ कारिणी॰ धारिणि॰ वैरिणि॰ सोरिभाग॰
गाव्यवह॰ मेदिनी॰ महावह॰॥ इति॥ लौगाक्षिकात्यायनसूत्रयोस्तु॥
माव्यप॰ दावतायन॰ आगद॰ आघ॰ हारिग्रीव॰ सौरी॰ श्यावानम॰ रैवता
न॰॥ इत्येते इध्मवाहाः॥ तेषां त्रयः॥ आगस्त्य दार्ढच्युत इध्मवाहेति॥ आ
पस्तंबसूत्रे राकोबा॥ आगस्त्येति॥ इति प्र॰ अगस्तिगणे इध्मवाहप्रथमः॥१॥
अथ सांभवाहाः॥ आश्वलायनसूत्रे॥ सांभवाहानां त्रयः॥ आगस्त्य

दार्ढच्युतसांभवाहेति॥ इतिप्र० अगस्तिगणे सांभवाह द्वितीयः॥२॥ सोम
वाहानां त्रयः॥ आगस्त्य दार्ढच्युत सोमवाहेति॥ इतिप्र० अगस्तिगणे सोम
वाहस्तृतीयः॥३॥ यज्ञवाहानां त्रयः॥ आगस्त्य दार्ढच्युत यज्ञवाहेति॥
इतिप्र० अगस्तिगणे यज्ञवाहश्चतुर्थः॥४॥ सूत्रांतरेष्वन्येपि अगस्त्यय
उक्ताः॥ तथाहि॥ लौगाक्षिसूत्रे॥ अगस्तयः॥ करंभयः० कुंडः० कौ
शल्यः० चमेवसः० मयोभुव० गोधारायण० पुलस्त्य० पुलह० क्रतु० ए
षां त्रयः॥ आगस्त्य माहेंद्र मायोभुवेति॥ पौर्णमासाः० पूरणाः० एषां त्रयः॥
आगस्त्य पौर्णमास पूरणेति॥ कात्यायनसूत्रे॥ दार्भावाहानां त्रयः॥ आ
गस्त्य दार्ढच्युत दार्भवाहेति॥ अक्र० शक्र० चाष० भाष० दन० चर्चि० हेमोद

॥३०॥

की० शुक० हंस॥ एषां त्रयः॥ आगस्त्य हैमपर्व हैमोदकीति॥ नंदी० विमली० ची
ली० मामलकी० पिनायक० पणक०॥ एषां त्रयः॥ आगस्त्य पैनायक पाणिके
ति॥ इह सर्वेषामगस्तीनामन्योन्यमविवाहः॥ गोत्रप्रवरैक्यात्॥ न विना
लोस्त्यगस्तीनां सर्वेषामितरेतरं॥ एकप्रवरसाम्यत्वाद्विवाहश्चेतरैर्ग
णैः॥१९॥ इति श्री कृष्णात्मज रघुनाथसूनुना गणेशपाठकेन विरचिते प्रव
रकौस्तुभे अगस्तिगणनिर्णितः॥२०॥ इत्थमेकोनपंचाशत् गणनिर्णि
ताः॥४९॥ अथ द्व्यामुष्यायणाः॥ विश्वामित्रगणे देवरातानां त्रयः॥
विश्वामित्र देवरात औदलेति॥ एषां विश्वामित्र जामदग्न्यैर्नान्वयः॥
जामदग्न्यगणस्यापि विश्वामित्रगणस्य च॥ न देवरातगोत्रेण विवाह

स्यात्परस्परं ॥ ४ ॥ यद्यपि देवरातो बोधायनादिसूत्रेषु क्वापि जामदग्न्येषु नोक्तः

तथापीदमाकूतं ॥ भारते ॥ और्वस्यैक ऋचीकस्य सत्यवत्यां महायशाः ॥ जामद

ग्निस्तपोवीर्यात् जज्ञे ब्रह्मविदां वरः ॥ १ ॥ मध्यमश्च शुनःशेपो शुनःपुच्छ कनिष्ठि

क इति ॥ तथा च रामायणे प्युक्तं ॥ देवरातः शुनःशेपो विश्वामित्रोऽथ भार्गवः ॥

दैवैर्यत्र सवैर्यस्माद्देवरातस्ततोऽभवत् ॥ ४ ॥ सह देवरातो विश्वामित्र आसन

स्यैते कपिलेय बाभ्रवा इति ॥ यद्यपि ऋचीतो शुनःपुच्छ ज्येष्ठ उक्तस्तथापि

॥ ३१ ॥

जमदग्नेरेव नामांतरं तदपितेयं ॥ शुनोलांगूलस्तस्यैव पर्याय इति ॥ अतोऽस्य

जामदग्न्यैर्विश्वामित्रैः सह न विवाहः ॥ इति प्रवरदर्पणोक्तेः ॥ जामदग्न्ये दे

वरातो विश्वामित्रकुलेऽर्पितः ॥ दत्तपुत्रतया नैषां वैवाह्यस्तद्गणद्वये ॥ ४ ॥

॥ ३२ ॥

गौतमगणे औतथ्य प्रवरयुक्तानां सर्वेषां गौतमानां च भारद्वाजैर्नान्वयः ॥

तदुक्तं विष्णुपुराणे ॥ बृहस्पतेः सकाशाद्भरद्वाजस्यौतथ्या सुसत्तेः सुत इति ॥

औतथ्यं गौतमैः सर्वैर्भरद्वाजगणैः सह ॥ विवाहो नैव कर्तव्यो औतथ्यो हि

द्विगोत्रजः ॥ ४ ॥ भरद्वाजगणे ॥ रौक्षायण गर्ग्य शैशिरादयः ॥ तथाहि ॥ आपस्तंबसू

त्रे ॥ रौक्षा० ग० शैशिरय० भरद्वाज० गाथ० शुंग० कत० ॥ तेषां पंच ॥ आंगि

रस बार्हस्पत्य भारद्वाज रौक्षायण गार्ग्य शैशिरेति ॥ यद्यपि रौक्षायण गार्ग्यादयो भरद्वाजग

णमध्ये पठितास्तथापि भरद्वाजाद्धाऽशुंगस्य बीजात् ॥ वैश्वामित्रवंश

स्थ कतगणांतर्गत शैशिरि शिशिरिक्षेत्रोत्पन्नाः रौक्षायण गार्ग्य शैशिरादय इत्युच्यंते ॥ अत

स्तत्संततिजानां पंचार्षेयः प्रवरो द्रष्टव्यः ॥ आंगिरस बार्हस्पत्य भारद्वा

जकायकिलेति॥ आंगिरसबार्हस्पत्यकात्यकिलेति इति आपस्तंबसूत्रे त्र्यार्षेयो वा॥ किलस्यानेष्टलेतिवा॥ भरद्वाजकात्यकिलेतिवा॥ एषां सर्वैर्भरद्वाजैर्विश्वामित्रैर्नान्वयः॥ सगोत्रत्वाद्वेति॥ विश्वामित्रभरद्वाजैर्नान्वयोः शौंगशैशिरैः॥ समानमुनिबाहुल्याच्छौंगाद्यास्तु द्विगोत्रजाः॥ १॥ विश्वामित्रगणेषु॥ कत॰ शौंग॰ शैसिरि॰ कात्यायन॰ किल॰ कात्यायनि॰ शालंकायन॰ मौंजहायन॰ लोकायनि॰ औदुंबरी॰ गंगायनि॰ एषां त्र्यः॥ विश्वामित्रकतकिलेति॥ विश्वामित्रकात्यायनआत्यकिलेति वेत्यापस्तंबसूत्रे॥ आंगिरसविश्वामित्रकतेति लोगाक्षिसूत्रे॥ एषां विश्वामित्रभरद्वाजैर्नान्वयः॥ सप्रवरत्वादिति॥ विश्वामित्रभरद्वाजैः किलकात्या

॥३२॥

यनाकतैः॥ विवाहो नैव कर्तव्यो कताद्यास्तु द्विगोत्रजाः॥ १॥ वशिष्ठगणेषु॥ वशिष्ठगणे संकृत्याद्यो प्युक्ताः॥ तथाहि॥ आपस्तंबसूत्रे॥ संकृति॰ पूतिमाष॰ पौल॰ तंडि॰ पौली॰ शांबु॰ शांभु॰ शैव॰ गव॰ परिभव॰ तारकाय॰ हारिग्रीव॰ मलक॰ षणाय॰ पूतिमाष्यायण॰ श्रौतायन॰ आग्नायन॰ शालायन॰ चांद्रायण॰ जानकि॰ भिल्लातकि॰ आग्रपय॰ वेल्लातकि॰ नाल॰ नगहि॰ गंगायनि॰ लाशायणि॰ तरप्यर्षि॰ लोगाक्षि॰ तैल॰ माविक॰ नैराय॰ आर्षिण्य॰ रूक्षेत संकृत्यादयः तेषां त्र्यार्षेयः॥ आंगिरस संकृति गौरवीति॥ शक्ति संकृति गौरवीतिवा॥ आंगिरसाजमीढकेत्येवेत्याश्वलायनसूत्रेवा॥ एषां संकृत्यादीनां सर्वभरद्वाजवशिष्ठकाश्यपैरविवाहः॥

॥३३॥

प्रवरैक्यसत्वात् ॥ काश्यपेयभरद्वाजवाशिष्ठैर्नान्वयो मिथः ॥ संस्कृतिनां त्रिगो
त्राणां द्व्यामुष्यायणसंज्ञया ॥१॥ उक्तं च ॥ संस्कृति पूतिमाष श्यङ्गभुस्त्रैव
गवादयः ॥ शांडिलैय्याघपादश्च भरद्वाजकुलोद्भवाः ॥६॥ कयश्री ताव
शिष्ठेन नोद्वाह्या स्युऋणद्वये ॥ एषां काश्यपेषु पाठात् काश्यपैर विवाह इति प्र
योगपारिजातोक्तेः ॥ तथैव प्रवरदर्पणेप्युक्तं ॥ काश्यपेय गणस्यापि वशि
ष्ठस्य गणस्य च ॥ संस्कृति पूतिमाषाणां विवाहो न परस्परं ॥१॥ इति ॥१॥
अथ वशिष्ठगणे ॥ जातूकर्ण्य० अर्थबोध० पाटले० वाशिष्ठ० दयालु० सौक्तिक०
रवम० ॥ एषां त्रयः ॥ वशिष्ठ अत्रि जातूकर्णेति ॥ एषां मत्रिवशिष्ठाभ्यां नान्वयः ॥
वशिष्ठात्रिगणैः सार्द्धं जातुकर्णेश्च नान्वयः ॥ समानमुनिबाहुल्याद्विवाहो

॥३३॥

न्यगणे मिथः ॥१॥ अत्रिगणे ॥ आत्रेय० वामरथ्य० गोपवन० पुत्रिक०
बालेय० हालेय० कालेय० बालेय० इति ॥ एषां त्रयः ॥ आत्रेय वामरथ्य
पौत्रिकेति ॥ तत्रैव धनंजयानां विश्वामित्र माधुछंदस धनंजयेति ॥
एषां विश्वामित्रात्रिभ्यां नान्वयः ॥ विश्वामित्रगणात्रिभ्यां वामरथ्य ध
नंजयैः ॥ विवाहो नैव कर्त्तव्यो मुनिसाम्यं मिथस्तयोः ॥१॥ कश्यपग
णे ॥ लौगाक्षाद्या उक्ताः ॥ बौधायनसूत्रे ॥ अवत्सवशिष्ठः ॥ नत्स्य कश्य
पः० लौगाक्षि० अनुद्दुभ० याभायन० भाकुरि० मैत्रवादि० वैहक०
पुरीरुल० शाकल्य० कसपत्रै० भालकायधि० परस्य० विरोदकि०
कौनामि० सौतकी० तानैयस्थ० अजपालेय० राजचारी० राजवसय०

सासुचि॰ कापुटी॰ पिंगाक्षी॰ सामाक्षी॰ जातंवी॰ रोपवत्सकी॰ राजहारी॰ रा
जसेबकी॰ टैवकी॰ भालुकायनि॰ खरोद्धरी॰ सोरी॰ सोरंध्री॰ कपिल॰ उप
शिव॰ पान्वयज॰ भभ्रकाल॰ अनामुक॰ काकुल॰ ॥ इति ॥ एषां त्रयः ॥ काश्य
पावत्सारवाशिष्ठेति ॥ बोधायनीये अन्ये त्रयः ॥ एते ॥ काश्यपावत्सा
रशिवेतिवा ॥ एषां सर्वे वशिष्ठ गोतम काश्यपैर्नान्वयः ॥ प्रवरैक्यसौत ॥
अत एवाह वशिष्ठानन्तं कश्यपाद्यन्तं चाह्निनकर्मणि वशिष्ठप्रयुक्त
प्रयाजादिभाज ॥ रात्रिमध्ये च कर्मणि कश्यपप्रयुक्त कार्यं वंत इति
प्रवरदर्पणोक्तेः ॥ तथाच संग्रहवाक्यानि ॥ काश्यपेन वशिष्ठेन की
नागोतमवंशजाः ॥ लौगाक्ष्या द्यानि शिममहिवा तेमे व्यवस्थिताः ॥ १ ॥

अतो गणत्रयोप्येते न विवाह्याः कथंचन ॥ यथ कोहवशिष्ठत्वं नक्तं कश्यप
तां गताः ॥ २ ॥ मुनिर्द्धि गोत्रस्तद्वत्स्या लौगाक्षाद्यो द्वि गोत्रजाः ॥ ३ ॥ व
शिष्ठ काश्यपैर्यैश्च गोतमैर्नान्वयं मिथः ॥ लौगाक्षिणां त्रिगोत्रत्वा द्यामु
ष्यायणसंज्ञया ॥ ३ ॥ कपिलानां त्रयः ॥ आंगिरस कपिल विश्वामित्रे
ति ॥ कतानां त्रयः ॥ आंगिरस विश्वामित्र कतेति ॥ विश्वामित्र कात्यकि
लेति बोधायनः ॥ एषामपि विश्वामित्र भरद्वाजैर्नान्वयः ॥ कतानां क
पिलानां च द्विगोत्रत्वात्परस्परं ॥ विश्वामित्रैर्भरद्वाजैर्नास्ति पाणिग्र
हो मिथः ॥ ४ ॥ कपिनां पंचत्रयो वा ॥ आंगिरस बार्हस्पत्य भारद्वाज वंदन
मातवचसेति ॥ आंगिरस आमहय्यरौक्षेति ॥ आंगिरस बार्हस्पत्य क

॥ ३४ ॥

॥ ३४ ॥

पयेतिवा॥स्वतंत्रश्चास्वतंत्रश्चद्वौकपीगणभेदतः॥उभयोर्नविवाहो
स्तित्रिद्विचप्रवरैक्यतः॥४॥गर्गाणांपंच॥गर्गश्चाथभरद्वाजबार्ह
स्पत्यांगिरसेति॥त्रयोवा॥आंगिरसगर्गसैन्यैत्याश्वलायनसूत्रे॥
द्वाभ्यांगर्गाभ्यांसर्वैभरद्वाजैर्नान्वयः॥उक्तंच॥भरद्वाजर्षिकप
योगर्गाशैशिरायणाद्विजाः॥पंचैतेहिभरद्वाजागोत्रैक्यान्नान्व
युर्मिथः॥५॥विश्वामित्रवंशस्थकतगणेकात्यायनिकात्याय
नांत्रयः॥कतकिलविश्वामित्रेति॥आंगिरसकात्यकिलेत्या

पस्तंवः॥एषांविश्वामित्रभरद्वाजैर्नान्वयः॥एवमेकनामत्वेतिग
णभेदेप्रवरभेदेचऋषीणांभेदात्परस्परस्यभवत्येवविवाहः॥

॥३५॥

लोकेएकनाम्नामनेकेषांपुंसांदर्शनादिदमुक्तं प्रवरमंजर्यां॥तेनगोत्रभू
तर्षिभेदाश्रयमाणत्वेनप्रवरेष्वनुवृत्तिरितिप्रवरदर्पणोक्तेः॥लो
केचेतुल्यनामानोभिन्नप्रवरगोत्रजाः॥वैवाह्यास्तुमिथोभेदाद्गोत्र
प्रवरभेदतः॥६॥द्व्यामुष्यायणस्वरूपंनूच्यते॥आहतुःकात्यायनलो
गाक्षी॥कुलीनाश्चद्व्यामुष्यायणकुलिनाश्चद्विविधास्ते॥एषांपुरुषः
प्रजासन्तिरविच्छिन्नाभवतिसेसंततकुलिनाभवंति॥येनुसप्तमःयः पं
चपुरुषंवाश्रुतिसीलसंपन्नाःश्रोतमंतस्तेपितृमंतःपैतृमंतःपुरुषयो
आर्षेयास्तेसंततकुलिनाभवंति॥अथदत्तक्रयक्रीतकृत्रिमपुत्रिकापुत्राः
परिग्रहेणार्षेयाजातास्तेतुद्व्यामुष्यायणाभवंतीति॥इतिप्रवरकोस्तुभे

द्यामुष्यायणा निर्णिताः॥ एवं इदानींतनो नामपि दत्तक्रीतस्त्रीमकानीनक
न्यकापुत्राणामपि उभयोः पित्रोः सगोत्रे रविवाहः॥ गोत्ररिक्थे जनपितु
र्न भजेद्भित्रः सुतइति मनुवचनाद्दत्तादीनां पुत्राणां मुत्पादक गोत्रसंबंधाभा
वेपि पितृसगोत्रप्रतिषेधादसगोत्रान्वयापितुरीयत्र पितृग्रहणास्येतदे
व प्रयोजनं स्मृतिचंद्रिकादौस्मृतं॥ नन्वेवं दत्तादीनां पुत्राणां पुत्रपौत्रा
दीनां गोत्रद्वयविवाहे निषेधो न लभ्यते॥ इति चेन्न॥ तत्रापिपा
रिजातोदाहृतवचनां तेराल्लाभाभावात्॥ अतएव दत्तस्यैद्व्यरा
॥३६॥ तस्य द्यामुष्यायणेषु गणनं संगच्छते॥ गोत्रप्रवरमंजरीकारो
प्याह॥ द्यामुष्यायणानां दत्तादीनां पुत्राणामुभयोरुत्पादकपरि
॥३६॥

गृहीत्रोः सगोत्रेरविवाहः॥ प्रथमं प्रवरप्रोक्तो पितुरुत्पादकस्ययः॥
परिगृहीतुः पाश्चात्स ऊर्ध्वंगत्रोत्रिशिणो यथेसाश्वलायनोक्तेः॥
दत्तपुत्रादीनां तु श्राद्धादौ विशेषः॥ उभयोरप्यसौ पिंडदाता च ध
र्मत इति याज्ञवल्क्यवचनाद्दत्तक्रीतादि द्यामुष्यायणपुत्राणामुभयो
रुत्पादकपरिगृहित्रोः पित्रोः श्राद्धं कुर्यादिति॥ तथा च कात्यायनव
चनं॥ रिक्थं हरेयुः पिंडं चैभ्यस्त्रिपुरुषं दद्युः॥ द्वौ कुर्यादेकस्मिन्
श्राद्धे पृथगुद्दिश्यैकपिंडे द्वावनुकीर्तयेत्परिगृहीतास्योत्पादयिता
रं चा तृतीयात्पुरुषादिति॥ अतो नियामकवचनाद्दत्तपुत्रादेरुभ

यत्संबंधस्तादुभयोः श्राद्धं पृथगेकस्मिन्पिंडे द्वयोरुच्चारणेन वा कर्त्तव्यमि
ति सर्वेषां निबंधिनां मतमिति ॥ कन्यकापुत्रेण तु मातामहश्राद्धं कार्यं ॥
तदुक्तं सुमंतुना ॥ मातुः प्रथमपिंडं च निर्वपेत्पुत्रिकासुतः ॥ द्वितीयं
तु पितुस्तस्यास्तृतीयं तु पितुरिति ॥ ४ ॥ उभयं संबंधस्तूभयोः श्रा
द्धं कुर्यादिति ॥ तथा चोशनाः ॥ मातामहं तु मात्रादि पैतृकं पितृपू
र्वकं ॥ मातृतः पितृतो यस्मादधिकारोस्ति धर्मतः ॥ ५ ॥ यस्मादुभय
संबंधः पुत्रिकायाः सुतो ह्यसौ ॥ पूर्वं मातामहश्राद्धं पश्चात्पैतृकमाच
रेदिति ॥ ६ ॥ मदनरत्ने कृष्णभट्टीये गदितं ॥ गणेशसुधिना रचितो यं प्र

॥३५॥

वरकौस्तुभः ॥ गुणग्राह्यैर्बुधैः सोयमादरेण विभाव्यतां ॥ १ ॥

॥३५॥

गोत्रप्रवरसंदेहमः प्रापन्नचेतसां ॥ मोदं तनोतु विदुषां गोत्रप्रवर
कौस्तुभः ॥ २ ॥ इति श्रीकृष्णात्मजरघुनाथसूनुना गणेशपा
ठकेन विरचितं प्रवरकौस्तुभं संपूर्णं ॥ छ ॥ इदं पुस्तकं सदाशिव
बरडेइत्युपनामकेन लिखितं ॥ छ ॥ छ ॥ छ ॥ छ ॥

॥ हेपुस्तकप्रवरकोस्तुभाचहोय ॥